चतुरशीतिसिद्धानां
पूजाविधिःसहस्रपूर्णचन्द्रदर्शनपूजाव्रतोद्यापनविधिश्च
(चौरासीपूजाविधि)

सूचना- लगभग ८१ वर्ष पूरा हुँदा एक हजार पूर्ण चन्द्रमाको दर्शन भइसक्ने हुनाले त्यसपछिको कुनै पनि पूर्णिमामा सहस्त्र चन्द्रदर्शनव्रतोद्यापन गर्न सकिन्छ ।

चौरासी पूजामा चाहिने सामान हरु :

गणेश - आचार्य वरणीको सामान - धोती र उपर्ना, पञ्चपात्र, आचमनी, आसन, जनै, सुपारी, भेटी (द्रव्य) आदि ।

१६ हातको मण्डप, लिंगा २१, ध्वजा पताका, तोरण, पञ्चरंगी चँदुवा पूर्व दिनमा पूर्वांग, प्रायश्चित्त गोदान, पुण्याहवाचन, मातृका,' पूजा, आभ्युदयिक श्राद्ध, मण्डपादिको पूजा र दिक्पाल पूजा, ग्रह पूजा आदि आवश्यकीय विधि पूर्वदिनमानै गर्नुपर्दछ ।

दोस्रो दिन : सिद्धहरूको पूजाका निमित्त कलश ८४, थाली ८४, सुवर्ण प्रतिमा ८४, जनै, सुपारी, भेटी, वस्त्र, प्रत्येक वस्तु ८४,का दरले ठूला कलश २, ठूला थाली २, लक्ष्मीनारायणको पलत्रयनिर्मित सुवर्ण प्रतिमा १, रजतमिश्रित चन्द्रमाको रोहिणी सहित पलत्रयनिर्मित सुवर्ण प्रतिमा १।पूजा सामान ५। गणेशादि देवताहरूको पाठ, वेद पाठ, श्रीमद्भागवत, दुर्गाशप्तशती, गीता, विष्णु सहस्त्रनाम पाठ र देवी सहस्त्रनाम, गणेश सहस्त्रनाम, शिव सहस्त्रनाम र सूर्य सहस्त्रनाम पाठ तथा सिद्धादि सबै पूजित देवताहरूको हवनका निम्ति चरू पाथी ४, ब्राम्हण ८४, रूद्राभिषेक, सिद्धतोभद्र, सर्वतोभद्र, गाई दान, शय्या दान, घृतच्छायाको निम्ति कटौरा १, गायत्री जप ।

प्रयोग :

विधिनिर्देश : शक्ति भएकाले सधैं पूजा गर्नुपर्छ । नसके गणना गर्दा जहिले हजार चन्द्रमा पुगेको पूर्णिमा पर्छ त्यसैमा पूजा गर्नू । पूर्णिमा, मन्वादि, युगादि, विषुवत् संक्रान्ति अयन संक्रान्ति अथवा सामान्य संक्रान्ति आदि पुण्यपर्वहरूमा पूजनकाल मानिन्छ । कर्मकुशल, वेदज्ञ, आचार्यलाई निमन्त्रणा गर्नुपर्छ । सोह्र हातको मण्डप बनाई त्यसमा रंगीचंगी चँदुवा टाँगेर मण्डप सजाउनु पर्छ ।

प्रयोग : एतदुक्तं यथाशक्ति शक्तिमद्भिरामरणं पूजनीयम् । तदशक्ये स्वमतगणनया यत्र सहस्रपूर्णिमा, गता: तत्रैव पूजनम् । पूजनकालास्तु पौर्णमासी-मन्वादि-युगादि-विषुवायनसंक्रान्त्यादितिथयो ग्राह्या: । संक्रान्तिपौर्णमास्यादिपुण्यतिथौ कर्मकुशलमं श्रोत्रियमाचार्यं निमन्त्रेत । षोडसहस्तपरिमित मण्डपं विधाय तदुपरि पञ्चवर्णवितानकं (चँदुवा) प्रसार्य मण्डपं भूषयेत्

विधिनिर्देश - पूजा गर्ने दिन स्नान सन्ध्यादि नित्यकर्म सम्पादन गरी गोबरले लिपेको पूजास्थान (मण्डप) मा आएर यज्ञोपवीत धारण, कुशपवित्र धारण, पञ्चगव्यपान, आचमन, प्राणायाम गरी (पूजा का सबै सामग्रीहरू तयार पारेर) दियो बालेर **कर्मपात्र निर्माण, स्वस्तिवाचन, गणेश एवं इष्टदेवताहरूको** स्मरण गर्नुपर्छ ।

प्रयोग : पूजादिने प्रात: स्नानसन्ध्यादिनित्यकर्म समाप्य गोमयोपलिप्तं पूजास्थानमागत्य नूतनं यज्ञोपवीतं कुशपवित्रं च परिधाय पूजासामग्रीं संपाद्य पञ्चगव्यप्राशनं कृत्वा, आचम्य, प्राणायामं विधाय दीपं प्रज्वाल्य कर्मपात्रं कृत्वा तत्रस्थ जलेन **ॐ अपवित्र: पवित्रत्रोवेति**

आत्मानं पूजासामग्रींश्च सिञ्चेत्। ॐ **स्वस्तिन इन्द्र** इत्यादि वैदिकमन्त्रैः स्वस्तिवाचनं विधाय-

स्वस्तिवाचनमन्त्रा :

हरिः ॐ आनो भद्राः क्रतवो यन्तु विश्वतो दब्धासोऽपरितासऽउद्भिदः । देवा नो यथासदमिद्वृधेऽअसन्न प्रायुवो रक्षितारो दिवे दिवे ।।१।।देवानां भद्रा सुमतिर्ऋजुयतान्देवानाꣳ रातिरभिनोनिवर्तताम् । देवानाꣳसख्यमुपसेदिमा वयं देवानाꣳऽआयुप्रतिरन्तु जीवसे ।।२।। तान्पूर्वया निविदाहूमहे वयं भगं मित्रमदितिन्दक्षमस्त्रिधम् । अर्यमणं वरूणꣳ सोममश्विनासरस्वती नः सुभगा मयस्करत् ।।३।। तन्नो वातो मयो भुवातुं भेषजन्तन्माता पृथिवी तत्पिता द्यौः । तद् ग्रावाणः सोमसुतो मयो भुवस्तदश्विना शृणुतं धिष्ण्या युवम् ।।४।। तमीशानं जगतस्तस्थुषस्पतिन्धियञ्जिन्वभवसे हूमहेवयम् । पूषानोयथावेदसामसदवृधे रक्षिता पायुरदब्धः स्वस्तये ।।५।। स्वस्तिनऽइन्द्रो वृद्धश्रवाः स्वस्तिनः पूषा विश्ववेदाः । स्वस्ति नस्ताक्ष्योंऽअरिष्ठनेमिः स्वस्तिनोवृहस्पतिर्दधातु ।।६।। वृषदशवामरूतः पृश्निमातरः शुभं यावानो विदथेषुजग्मयः । अग्निजिहामनवः सूरचक्षसो विश्वेनो देवाऽअवसागमन्निह ।।७।। भद्रं कर्णेभिः

शृणुयाम देवा भद्रं पश्येमा क्षमिर्यजत्रः ।। स्थिरैरङ्गै स्तुष्टुवा᳟ सस्तनुभिर्व्यशेमहि देवहितं यदायुः ।।८।। इति स्वस्तिवाचनम् ।

ॐ श्री मन्महागणाधिपतये नमः । ॐइष्टदेवताभ्यो नमः । ॐ कुलदेवताभ्यो नमः । ॐ वास्तुदेवताभ्यो नमः । ॐ ग्रामदेवताभ्यो नमः । ॐ लक्ष्मीनारायणाभ्यां नमः । ॐ वाणीहिरण्यगर्भाभ्यां नमः । ॐ उमामहेश्वराभ्यां नमः । ब्राह्मणेभ्यो नमः । निर्विघ्नमस्तु -

सर्वेष्वारंभकार्येषु त्रयस्त्रिभुवनेश्वराः । देवा दिशन्तु नः सिद्धिं ब्रह्मेशानजनार्दनाः ।।

विनायकं गुरुं भानुं ब्रह्मविष्णुमहेश्वरान् । सरस्वतीं नमेदादौ सर्वकार्यार्थसिद्धये ।। इति ।

विधि निर्देशः - त्यसपछि देहशुद्धिको निम्ति **प्रायश्चित्तगोदान** गरी प्रतिज्ञा संकल्प गर्नू । संकल्पपछि **अपसर्पन्तु ये भूता०** पढेर सर्स्यूं आदि छर्कनू । दीप, कलश, गणेशपूजा, मातृकापूजा, आभ्युदयिक श्राद्ध गरी ब्राह्मणवरण र पुण्याहवाचन गर्नू ।

ततः प्रयोग :

ततो देहशुद्ध्यर्थं **प्रायश्चित्तगोदानं**, चान्द्रायणादिकं कुर्यात् । ततः **प्रतिज्ञासंकल्पः** - हरिः ॐ तत्सत् ३ इत्यादि देशकालादीन् सङ्कीर्त्य अमुकगोत्रोऽमुकप्रवरः शुक्लयजुर्वेदान्तर्गतमाध्यन्दिनीयशाखाध्यायी, अमुक शर्माऽहं मम

चौराशी०

श्रुतिस्मृतिपुराणोक्तफलप्राप्त्यर्थमितज्जन्मपूर्वजन्मकृतकायिकवाचिकमानसिकसांसर्गिकज्ञाताज्ञाताश्पृश्यस्पर्शाभोज्यभोजनागम्यगमनादिब्रह्महत्यान्तसकलनिन्द्यकर्मजन्यदोषोपशान्त्यर्थमिहलोके सुखप्राप्तिपूर्वकं परत्र विष्णुलोकावाप्तिद्वारा मोक्षलाभार्थञ्च चन्द्रसहस्रदर्शनव्रतोद्यापनरूपेण चतुरशीतिप्रतिमासु चतुरशितिसिद्धपूजनमहाकाल्यादिपूजनं सूर्यस्य द्वादशनामभिः सप्तावृत्या तथाष्टविंशतिनक्षत्राणां त्रिरावृत्या मध्ये रोहिणीसहितस्य चन्द्रस्य लक्ष्मीनारायणयोश्च पूजनं तत्पूर्वङ्गत्वेन,दीपकलशगणेशपूजनं पुण्याहवाचनं, ब्राह्मणवरणं, रक्षाबन्धनपूजनं, मातृकापूजनम् - आभ्युदयिकश्राद्धं, श्रीमद्भागवतादिपाठं हवनञ्च ब्राह्मणद्वारा अहं करिष्ये इति उत्सृजेत् । ततः **अपर्सन्तु ये** भूता इति सर्षपादीन् विकिरेत् । दीपकलशगणेशादीन्पूजयित्वा मातृकापूजनम् - आभ्युदयिक- श्राद्धञ्च कुर्यात् । ततो गन्धाक्षतपूगीफलद्रव्ययज्ञोपवीतपुष्पमालावस्त्रालंकरणादिभिराचार्यम्, गणपतिं तथान्यानपि पाठजपहवनादिकर्मकर्तृन्ब्राह्मणान्वृणुयात् । ततः **पुण्याहवाचनं** कुर्यात् ।

विधि निर्देशः-पुण्यावाचन गर्दा पहिले आफ्नो हातमा बाध्न मिल्ने ४ अंगुल चौड़ा र एक हात लामो दुवैतिर विट भएको मिलेसम्म रेशमी कपड़ा फिजाई पाँच स्थानमा सुपारी, दुवो, अक्षता, फुल, चन्दन, सर्स्यूँ पैसा (भेटी) सबै राखी प्रत्येक ब्राह्मणलाई टीका लगाई पहिले

राखिएका सबै वस्तु हातमा दिने र आफुले पनि हातमा फल लिएर शान्तमना (चित्त हृदयमा राखी) तल दिइएका मन्त्र पढ्नु या ब्राह्मणद्वारा पढ्न लगाउनु ।

अथ पुण्याहवाचनम् -

पूर्वोक्तरीत्याकृतवरणान् चतुरः पञ्च वा ब्राह्मणान् प्रत्यङ्मुखान् कृत्वा प्राङ्मुखो यजमानः पट्टवस्त्रे पञ्चस्थाने साक्षतदूर्वादलपुष्पगन्धद्रव्यपूगीफलादीनि निक्षिप्य ब्राह्मणानां हस्ते दत्त्वा स्वयं फलमादाय कृताञ्जलिः - **(ॐ तत्सत् पूर्वसंकल्पं सिद्धिरस्तु अमुकगोत्रस्यामुकप्रवरस्यामुकशर्माणो मम मोक्षावाप्तये करिष्यमाण सहस्रचन्द्रदर्शनपूजनकर्मणि तथा चतुरशीतिसिद्धादिपूजनकर्मणि भो ब्राह्मण:) ॐ पुण्याहं** (१) भवन्तो ब्रुवन्तु इति त्रिवारमुच्चैर्वदेत् । ब्राह्मणाश्च **ॐ पुण्याहमिति** त्रिवारमुच्चैर्वदेयुः । ततो ब्राह्मणाः ॐ **पुनन्तु मा देवजनाः पुनन्तु मनसाधियः । पुनन्तु विश्वाभूतानि जातवेदः पुनीहि मा ।।** इत्युच्चैः पठेयु । ततो यजमान : कोष्ठान्तर्गतं पूर्ववाक्यमुच्चार्य

ॐ स्वस्ति ०२) भवन्तो ब्रुवन्तु ३ इति त्रिः, ब्राह्मणाश्च:- ॐ **स्वस्ति** ३ इति तिरुक्त्वा ॐ **स्वस्तिनऽइन्द्रो वृद्धश्रवाः । स्वस्तिनः पूषाः विश्ववेदाः । स्वस्तिनस्तार्क्ष्योऽअरिष्टनेमिः स्वस्तिनो वृहस्पतिर्दधातु ।।** इति पठेयुः । पुनः पूर्ववत्

सङ्कल्पं पठित्वा यजमानः ॐ **ऋद्धिम्** (३) **भवन्तो ब्रुवन्तु** ३ इति त्रिः, ब्राह्मणाः - ॐ **ऋद्धिः** (३) ॐ **सत्रस्यऽऋद्धिरस्य गन्मज्ज्योतिरमृताऽअभूम । दिवं पृथिव्याऽअध्यारुहामाविदामदेवान् स्वर्ज्योतिः** । पुनः पूर्ववत् सङ्कल्पं पठित्वा यजमानः- ॐ **वृद्धिं** (४) **भवन्तो ब्रुवन्तु** ३ इति त्रिः । ब्राह्मणाश्च - ॐ **वृद्धिः** ३ ॐ **ज्यैष्ठ्यञ्चर्मआधिपत्यं च मे मन्युश्चमे भामश्चमे मश्च मे जेमा च मे महिमा च मे वरिमा च मे प्रथिमा च मे वर्षिमा च मे द्राधिमा च मे बृद्धं च मे वृद्धिश्च मे यज्ञेन कल्पन्ताम्** । इति । पुनः पूर्ववत् संङ्कल्पं पठित्वा यजमान : - ॐ **कल्याणं** (५) **भवन्तो बुवन्तु** ३ इति त्रिः, **ब्राह्मणाः**- ॐ **कल्याणं** ३ इति त्रिः, ॐ **यथेमा वाचं कल्याणीमावदानि जनेभ्यः । ब्रह्मराजन्याभ्याᳬ शूद्रायचार्याय च स्वायचारणाय च । प्रियो देवानां दक्षिणायै दातुरिह भूयासमयम्भे कामः समृद्धयतामुपमादो नमतु** ।। इति । पुनः पूर्ववत् सङ्कल्पं पठित्वा यजमानः - ॐ **शान्तिं** (६) **भवन्तो ब्रुवन्तु** इति ३ त्रिः । ब्राह्मणाः - ॐ **शान्तिः** ३ ।।ॐ **द्यौः शान्तिर्ब्रह्म शान्तिरन्तरिक्ष ᳬ शान्तिः पृथिवी शान्ति रापः शान्ति रोषधयः शान्तिः । व्वनस्पतयः शान्तिर्विश्वेदेवाः शान्तिर्ब्रह्म शान्तिः सर्व ᳬ शान्ति : शान्तिरेव शान्तिः सामा शान्तिरेधि** ।।इति । पुनः पूर्ववत् सङ्कल्पं पठित्वा यजमानः - ॐ **श्रियं** (७) **भवन्तो ब्रुवन्तु** ३ इति त्रिः, ब्राह्मणाः ॐ **श्रीः** ३ ॐ **मनसः काममाकूतिं वाचः सत्यमसीय । पशूना ᳬरूपमन्नस्यरसो यशः श्रीः श्रयताम्** ।। इति पठित्वा -

ॐ श्रीर्वचस्वमायुष्यमारोग्यमाविधात् पवमानं महीयते ।

धनं धान्यं पशुं बहुपुत्रलाभं शतं संवत्सरं दीर्घमायुः ॥१॥

मन्त्रार्थाः सफलाः सन्तु पूर्णाः सन्तु मनोरथाः । शत्रूणां बुद्धिनाशोऽस्तु मित्राणामुदयोस्तुवः ॥२॥

अव्याधिना शरीरेण मनसा च निराधिना । पूरयन्नर्थिनामाशास्त्वं जीव शरदां शतम् ॥३॥

इति पठन्तः साक्षतदूर्वादलपूगीफलानि यजमानायः अर्पयेयुरिति पुण्याहवाचनम् ।

विधि निर्देशः-रुद्राभिषेकको लागि यथास्थानमा रुद्रस्थापना गरी एकादश रुद्री, नवचण्डी, चौबीसहजार गायत्रीजप र प्रति हजार ग्रहजाप अथवा पाठजप ब्राह्मणहरूले गर्नुपर्छ । पारस्कर गृह्यसूत्र बमोजिम **पञ्चभूसंस्कार** पूर्वक अग्निस्थापना गरी होम आरम्भ गर्नुपर्छ ।

प्रयोगः-ततो रुद्राभिषेकार्थं यथास्थानं रुद्रस्थापनं कृत्वा एकादशरुद्री, नवचण्डी, चतुर्विंशति सहस्रवार गायत्रीजपं प्रतिसहस्रग्रहमंत्र ब्राह्मणाः पठेयुः, जपेयुश्च । ततः **पारस्करगृह्योक्त**विधिनाः **पञ्चभूसंस्कारपूर्वकं** होमं प्रारभेत् ।

विधि निर्देशः- वेदीको पमण्डपको गाझमा चन्द्रपूजाको निम्ति वस्त्र (कपडामा सर्वतोभद्र लेखेर

त्यसमा धान, चामल, राख्नू । धान,चामलमाथि तीर्थादिजलले पूर्ण कलश र कलशमाथि तामाको थालीमा सुन् चाँदीले बनेको रोहिणी सहितको चन्द्रमाको प्रतिमा स्थापना गर्नू ।

प्रयोगः - **अथ पूर्णिमायां चन्द्रपूजा-** मडण्पमध्ये चन्द्रपूजनार्थं सर्वतोभद्रं वस्त्रे विलिख्य तन्मध्ये धान्यतण्डूले निधाय तदुपरि तीर्थादिजलपूर्णकलशं तन्मुखे ताम्रस्थालीं निधाय तत्र सरजतसुवर्णनिर्मितां रोहिणीसहितचन्द्रप्रतिमां स्थापयेत् ।

विधि निर्देशः -पुरा क्रूरस्य० मन्त्रको एक हजार जप, सोमसूक्त मन्त्र १०८ अथवा २८ जप्नु । अथवा तल लेखिएका सोमसूक्तहरूको पाठ गर्नू । लोकपालपूजा र **वेदीको मध्यमा अनन्त र कूर्मकोपीठ मुनि, अधर्म,** इत्यादिको ईशानादि क्रमले पूजा गरेपछि **महीद्यौ०** ले भूमिशेधन, धान्यस्थापन, कलशस्थापना, कलशमाथि तामाका भाँडामा अग्निमा तताएर शुद्ध बनाएका सुनको प्रतिमा स्थापना गर्नू ।

ॐ पुरा क्रुरस्य विसृपो विरप्शिन्नुदाय पृथिवीं जीवदानुम् । यामैरयँञ्चन्द्रमसि स्वधाभिस्तामु धीरासो अनुदिश्य यजन्ते । प्रोक्षणीरासादय द्विषतो वधोऽसि ।।

सोमसूक्तम् -

ॐआप्यायस्व समेतु ते विश्वतः सोम वृष्ण्यम् । भवा वाजस्य सङ्गथे ।।१२।।

सं ते पयाꣳसि समु यन्तु वाजाः सं वृष्ण्यान्यभिमातिषाहः ।

आप्यायमानो अमृताय सोम दिवि श्रवाꣳस्युत्तमानि धिष्व ।।१३।।

आप्यायस्व मदिन्तम सोम विश्वेभिरꣳशुभिः । भवा नः सप्रथस्तमः सखा वृधे ।।१४।।

अषाढं युत्सु पृतनासु पप्रिꣳस्वर्षामप्सां वृजनस्य गोपाम् ।

भरेषुजाꣳसुक्षितिꣳसुश्रवसं जयन्तं त्वामनु मदेम सोम ।।२०।।

सोमो धेनुꣳसोमो अर्वन्तमाशुꣳसोमो वीरं कर्मण्यं ददाति ।

सादन्यं विदथ्यꣳसभेयं पितृश्रवणं यो ददाशदस्मै ।।२१।।

त्वमिमा ओषधीः सोम विश्वास्त्वमपो अजनयस्त्वं गाः ।

त्वमाततन्थोर्वन्तरिक्षं त्वं ज्योतिषा वि तमो ववर्थ ।।२२।।

देवेन नो मनसा देव सोम रायो भागꣳसहसावन्नभि युध्य ।

मा त्वा तनदीशिषे वीर्यस्योभयेभ्यः प्रचिकित्सा गविष्टौ ।।२३।। (यजु. ३४/२०-२३)

प्रयोगः- पुरा क्रूरस्य इति मन्त्रस्य जपसहस्रं कार्यम् । शुक्लयजुर्वेदस्य द्वादशाध्याये **आप्यायस्वसमेतुते** इति मन्त्रादारभ्य ११२-१३-१४ पर्यन्तं **सोमसूक्तम्** १०८ वा २८ जपनीयम् । अथवा शुक्लयजर्वेदस्य चतुस्त्रिंशदध्यायस्य **विंशतिमन्त्रतस्त्रयोविंशति**मन्त्रपर्यन्तं मन्त्रचतुष्टयं सोमसूक्तं पठनीयम् । ततो लोकपालानां पूजा, मध्ये वेद्यामनन्तकूर्मौ पीठादधो धर्ममधर्मं ज्ञानमज्ञानं वैराग्यावैराग्यमैश्वमनैश्वर्यमीशानादिक्रमेण पूजयित्वा **महीद्यौरिति** मन्त्रेण **भूमिशोधनं** कृत्वा **धान्यमसि** इति धान्यं स्थापयेत् । तत्र कलशं संस्थाप्य तेषामुपरि ताम्रपात्रेषु अग्न्युत्तारणपूर्वकं सुवर्णप्रतिमाः स्थापनीयाः

विधि निर्देष -प्रतिमाहरूको अग्न्युत्तारण गर्दा पहिले **ॐ** तत्सत् इत्यादि सङ्कल्प गीर यी मूर्तिहरूमा निर्माण गर्दा परेको चोट हटाउन देवताको सान्निध्यका निम्ति प्राणप्रतिष्ठा गर्नेछु भनी मूर्तिलाई

पहिले आगोमा तताउनु, पञ्चगव्यले र घिउले धोई शुद्ध जलले पखालेर अर्को पात्रमा राखी प्रतिमामा गाईको दूध र जलको धारा लगाउँदै निम्न सूक्त पढ्ने र पछि पञ्चामृतले स्नान गराई कपडाले पुछी थालीमा राख्नु पर्छ ।

आचम्य प्राणानायम्य अग्न्युत्तारणपूर्वकं प्रतिमायां प्राणप्रतिष्ठां कुर्यात् । अथाग्न्युत्तारणसूक्तम्- देशकाला दीन्सङ्कीर्त्य- अस्यां मूर्तावघातादिदोषपरिहारार्थमग्न्युत्तारणं देवतासान्निध्यार्थं च प्राणप्रतिष्ठां करिष्य इति सङ्कल्प्य मूर्तिं पूर्वमग्नौ तापयित्वा पञ्चगव्येन घृतेन चाभ्यज्य शुद्धजलेन प्रक्षाल्य पात्रान्तरे निधाय प्रतिमोपरि दुग्धधारां जलधारां च यथाक्रमं पातयन् सूक्तं पठेत्-

ॐ समुद्रस्य त्वा वकयाग्ने परिव्ययामसि । पावकोऽअस्मभ्यꣳशिवो भव ।।१।। हिमस्य त्वा जरायुणाग्ने परिव्ययामसि । पावकोऽअस्मभ्यꣳशिवो भव ।।२।। अयामिदं न्ययनꣳसमुद्रस्य निवेशनम् । अन्याँस्तेऽअस्मतपन्तु हेतयः पावकोऽअस्मभ्यꣳशिवो भव ।।३।। नमस्ते हरसे शोचिषे नमस्तेऽअस्त्वर्चिषेऽअन्याँस्तेऽअस्मत्तपन्तु हेतयः । पावकोऽअस्मभ्यꣳशिवो भव ।।४।। प्राणदा अपानदा व्यानदा वर्च्चोदा वरिवोदाः । अन्याँस्तेऽअस्मत्तपन्तु हेतयः पावकोऽअस्मभ्यꣳशिवो भव

।।५।। अग्ने पावकरोचिषामन्द्रयादेवंजिह्वया । आदेवान्वक्षियक्षि च ।।६।। सनः पावकदीदिवोऽग्ने देवाँ२ऽइहावह । उपयज्ञहविश्चनः ।।७।। एवमग्न्युत्तारणं कृत्वा पञ्चामृतेन संस्नाप्य वस्त्रेण प्रोञ्छय स्थाल्यां स्थापयेत् ।

विधि निर्देषः - सर्वप्रथम **सिद्धतोभद्र** लेखेर त्यसका बाहिर चारकोणमा ईशानादि क्रमले सनकादि कुमारहरूको पूजा गरी सिद्धतोभद्रको वरिपरि दश रेखामा सिद्धतोभद्र मण्डलका देवताहरूको ईशानादिक्रमले पूजा गर्नू । अर्घस्थापना गरी अर्घको मन्त्रोच्चारणपूर्वक संस्कार गर्नू ।

अर्घस्थापनम् -

स्वाग्रे किञ्चिद्वामे त्रिकोणं विलिख्य **ॐ आधारशक्तिकमलाशनाय नमः, भूम्यै नमः,** इति समर्च्य तत आधारं संस्थाप्य दशकलात्मने वह्निमण्डलाय नमः इति सम्पूज्य तदुपरि अस्त्राय फडिति त्रिर्जलेन प्रोक्षितमर्घ्यपात्रं संस्थाप्य तत्र द्वादशकलात्मने सूर्यमण्डलाय: नमः, इति सम्पूज्य ततश्चन्द्रमण्डलनिर्गतसुधारूपेण ध्यातैः शुद्धतोयैः श,ल,ह,स,ष,श,इत्याद्यकारान्त विपरीतमातृकां मूलमंन्त्र जपन् । तत्र दधिगन्धपुष्पाक्षतपूगीफलयवतिलसर्षपदूर्वाकुशाग्राणि च दत्वा षोडशकलात्मने

चौराशी० चन्द्रमण्डलाय नमः, इति पूजित्वा देवतारूपं जलं विभाव्य -**ॐ गंगे च यमुने चैव गोदावरी सरस्वति । नर्मदे सिन्धो कावेरि जलेऽस्मिन् सन्निधिं कुरु ।** इति मन्त्रेण अंकुशमुद्रया सूर्यमण्डलात्तीर्थमावाह्य शंखमत्स्यधेनुमुद्राः प्रदर्श्य किञ्चिद्भूमौ सूर्याय अर्घं दत्त्वा प्रणवमष्टधाजपन् तत्रैव स्थापयेत् ।

प्रयोगः-प्रथमं सिद्धतोभद्रमालिख्य सिद्धकोष्ठाद्बहिरीशानादि क्रमतश्चतुष्कोणेषु **सनक-सनन्दन-सनातन-सनत्कुमारान्**संपूज्य सिद्धतोभद्रमण्डलस्य देवानां दध्यक्षतादिभिः ईशानादिक्रमेण परितो दशरेखाया पूजयेत् । **ॐ ऋद्ध्यै नमः १, ॐ बुद्ध्यै नमः २,**

नमः २, ॐतुष्ट्यै नमः ३, ॐपुष्ट्यै नमः ४,ॐदयायै नमः ५, ॐक्रियायै नमः ६, ॐउन्नत्यै नमः:७, ॐ क्षमायै नमः ८, ॐयोगायै नमः ९, ॐशुभ्रायै नमः १०, ॐविद्युते नमः ११,ॐप्रभावत्यै नमः १२,ॐ सौर्यै नमः १३, ॐ चान्द्र्यै नमः१४, ॐ कलायै नमः १५, ॐ मोघायै नमः १६, ॐ सिद्धायै नमः १७, ॐ कान्त्यै नमः १८, ॐ शान्त्यै नमः १९, ॐ क्षान्त्यै नमः २०,

विधि निर्देशः-यसपछि चौराशी कोठामा ईशानादि क्रमले नाममन्त्र उच्चारणपूर्वक प्राणप्रतिष्ठा

आवाहनपूर्वक तल लेखिएबमोजिम सिद्धहरूको प्राणप्रतिष्ठापूर्वक पूजा गर्नू-

चौराशी० **प्रयोग:** - ततश्चतुरशीतिकोष्ठेषु ईशानादिक्रमेण नाममन्त्रैः प्राणप्रतिष्ठावाहनादिपूर्वकं सिद्धादीन्पूजयेत्- तत्प्रकारश्च यथा चन्दनाक्षतपुष्पैः प्रतिमाः स्पृष्ट्वा ।

प्राणप्रतिष्ठामन्त्र: -

ॐ मनोजूतिर्जुषतामाज्यस्य बृहस्पतिर्यज्ञमिमन्तनोत्वरिष्टं यज्ञꣳसमिमन्दधातु । विश्वेदेवासऽ इहमादयन्तामों२ प्रतिष्ठ । इति मन्त्रेण ॐ भूर्भुवः स्वः चतुरशीति सिद्धा इहागच्छन्तु, इह यावत् पूजां करोमि तावत्सुस्थिराः सुप्रसन्ना वरदा भवन्तु । इति प्रतिष्ठाप्य ॐ सिद्धमावाहयामि । सिद्धाय नमः ध्यानम, आसनम, पाद्यम, अर्घ्यम, आचमनीयम, पञ्चामृतम् शुद्धोदकम् । यज्ञोपवीतम् वस्त्रम् चन्दनम् अक्षताः पुष्पाणि समर्प्य धूपं दीपं नैवेद्यं च कारयित्वा ताम्बुलं पूगीफलं दक्षिणाश्च यमर्पयेत् । एवमन्यानपि पूजयेत्- **ॐ सिद्धाय नमः १, ॐ सिद्धेश्वराय:नमः २, ॐ सिद्धसुखाय नमः ३, ॐ सिद्धदर्शनाय नमः ४, ॐ महासिद्धाय नमः ५, ॐ सिद्धदेवाय नमः ६, ॐ सिद्धशास्त्राय नमः ७, ॐ सिद्धाचार्याय** नमः८, **ॐज्ञानसिद्धाय नमः ९, ॐसिद्धभुजे नमः१०, ॐ सिद्धदक्षिणाय नमः ११, ॐ**

तीर्थसिद्धाय नमः१२, ॐ योगसिद्धाय नमः१३, ॐभोगसिद्धाय नमः१४, ॐ गुणसिद्धाय नमः१५, ॐ चन्द्रसिद्धाय नमः १६, ॐगणसिद्धाय नमः१७, ॐ अतिसिद्धाय नमः१८, ॐ सिद्धसेनाय नमः १९, ॐ सिद्धघटाय नमः२०, ॐ सिद्धसूर्याय नमः२१, ॐ अनुसिद्धाय नमः२२, ॐ सिद्धकालाय नमः२३, ॐ सिद्धकामाय नमः२४, ॐ सिद्धब्रह्मस्वरूपाय नमः२५, ॐ सिद्धकर्त्रे नमः२६, ॐ सिद्धभर्त्रे नमः२७, ॐ सिद्धिदाय नमः२८, ॐ सिद्धिसाधकाय नमः२९, ॐ सिद्धातिगाय नमः३०, ॐ कलासिद्धाय नमः३१, ॐ सर्वसिद्धाय नमः३२, ॐ प्रसिद्धकाय नमः ३३, ॐ सिद्धमानाय नमः ३४, ॐ सिद्धकल्पाय नमः ३५, ॐ सिद्धामृतकालातीताय नमः३६, ॐ सिद्धपाराय नमः३७, ॐ सिद्धज्ञानाय नमः३८, ॐसिद्धनायकाय नमः३९, ॐ सिद्धविलाय नमः४०, ॐ सत्तिसिद्धाय नमः४१, ॐ सिद्धभव्याय नमः४२, ॐ सिद्धैकसाधनाय नमः४३, ॐ लोकसिद्धाय नमः ४४, ॐ ज्ञयसिद्धाय नमः ४५, ॐ शुद्धसिद्धाय नमः ४६, ॐ अवसिद्धाय नमः ४७, ॐ वषट्सिद्धाय नमः ४८, ॐ स्वस्ति सिद्धाय नमः ४९, ॐ भूतसिद्धाय नमः ५०, ॐ अधिसिद्धाय नमः ५१, ॐ भव्यसिद्धाय नमः ५२, ॐ पूतसिद्धाय नमः ५३, ॐ शंभुसिद्धाय नमः ५४, ॐ सुसिद्धाय नमः ५५ ॐ दक्षसिद्धाय नमः ५६, ॐ रूपसिद्धाय नमः ५७, ॐ हंससिद्धाय नमः ५८, ॐ प्रसिद्धाय नमः ५९, ॐ

विष्णुसिद्धाय नमः ६०, ॐ मुक्तसिद्धाय नमः ६१, ॐ सिद्धसिद्धाय नमः ६२, ॐ सिद्धवाच्चे नमः ६३, ॐ सिद्धधाम्ने नमः ६४, ॐ सिद्धतनवे नमः ६५, ॐ सिद्धानन्दस्वरूपाय नमः ६६, ॐ पुण्यसिद्धाय नमः ६७, ॐ भुवःसिद्धाय नमः ६८, ॐ स्वर्गसिद्धाय नमः ६९, ॐ सिद्धमन्त्राय नमः ७०, ॐ शान्तिसिद्धाय नमः ७१, ॐ पुरूसिद्धाय नमः ७२, ॐ हिरण्यसिद्धाय नमः ७३, ॐ वाक्सिद्धाय नमः ७४, ॐ तत्वसिद्धाय नमः ७५, ॐअति सिद्धाय नमः ७६, ॐ सिद्धरत्नाय नमः ७७ ॐ सिद्ध मालिने नमः ७८ ॐ सिद्ध वैकुण्ठ रूपिणे नमः ॐ सिद्ध सेनायःनमः ८०, ॐ ईशान कोण कोष्ठे नमः ८१, ॐ आग्नेय कोणे नमः ८२, ॐ नैर्ऋत्य कोणे नमः ८३, ॐ वायव्यकोणे नमः ८४, इति पूजा विधाय धूपं, दीपं,नैवेद्यं, फलं, ताम्बूलं, दक्षिणाञ्च प्रत्येक समर्प्य नीराजनं च कुर्यात्।

विधि निर्देषः - प्राणप्रतिष्ठा र आवाहनपूर्वक सिद्धहरूको पूजा गरे जस्तै गरी सिद्धयोगिनीहरूको पूजा गर्नू -

प्रयोगः -

अथ **सिद्धयोगिनी** पूजा पूर्ववत् ॐ **ऐं महाकाल्यै नमः** आवाहनम, ध्यानम, आसनम्, पाद्यमर्घ्यमाचमनीयं, पञ्चामृतं, वस्त्रचन्दनाक्षतपुष्पाणि समर्पयेत्। एवं प्रत्येकम् **ॐ ऐं महाकाल्यै नमः** -

चौराशी०

१ ॐ ह्रीं महासरस्वत्यै नमः २ ॐ क्लीं महालक्ष्मै नमः ३, ब्रां ब्राह्मीदेव्यै नमः ४, ॐ गौं गौरीदेव्यै नमः ५, ॐ लं लँक्ष्मीदेव्यै नमः ६, ॐ अं अष्टादशभुजायै नमः ७, ॐ दं दशाननायै नमः ८, ॐ अं अष्टभुजायै नमः ९, नं नन्दायै नमः १०, ॐ रं रक्तदन्तिकायै नमः ११, ॐ शं शाकम्भर्यै नमः १२, ॐ दुं दुर्गायै नमः १३, ॐ भीं भीमायै नमः १४, ॐ भ्रां भ्रामर्यै नमः १५, ॐ जं जयायै नमः १६, ॐ विं विजयायै नमः १७, ॐ जं जयन्त्यै नमः १८, ॐ अं अपराजितायै नमः १९, ॐ सिं सिद्धायै नमः २०, ॐ मं महिषासुरमर्दिन्यै नमः २१ ॐ ब्रां ब्राह्मयै नमः २२ मां माहेश्वर्यै नमः २३, ॐ कौं कौमार्यै नमः २४, ॐ वैं वैष्णव्यै नमः २५, ॐ वां वाराह्यै नमः २६, ॐ नां नारसिंह्यै नमः २७, ॐ ऐं ऐन्द्र्यै नमः २८, ॐ चां चामुण्डायै नमः २९, ॐ अं असिताङ्गभैरव्यै नमः ३०, ॐ रुं रुरुभैरवाय नमः ३१, ॐ चं चण्डभैरव्यै नमः ३२, ॐ क्रों क्रोधभैरव्यै नमः ३३, ॐ दं दण्डभैरव्यै नमः ३४, ॐ कं कपालभैरव्यै नमः ३५, ॐ भीं भीषणभैरव्यै नमः ३६, ॐ सं संहारभैरव्यै नमः ३७, ॐ विं विष्णुमायायै नमः ३८, ॐ चें चेतनायै नमः ३९, ॐ बुं बुद्ध्यै नमः ४०, ॐ निं निद्रायै नमः ४१, ॐ क्षुं क्षुधायै नमः ४२, ॐ छां छायायै नमः ४३, ॐ शं शक्त्यै नमः ४४, ॐ तृं तृष्णायै नमः ४५, ॐ क्षां क्षान्त्यै नमः ४६, ॐ जां जात्यै ४७, ॐ लं लज्जायै नमः ४८, ॐ शां शान्त्यै नमः ४९, ॐ श्रं श्रद्धायै नमः ५०, ॐ क्रां कान्त्यै नमः ५१, ॐ लं लक्ष्म्यै नमः ५२, ॐ धृं

चौराशी० धृत्यै नमः ५३, ॐ बृं बृत्यै नमः ५४, ॐ स्मृं स्मृत्यै नमः ५५, ॐ दं दयायै नमः ५६, ॐ तुं तुष्टयै नमः ५७, ॐ पुं पुष्ट्यै नमः ५८, ॐ मा मात्रे नमः ५९, ॐ भ्रां भ्रान्त्यै नमः ६०, ॐ चिं चिन्तायै नमः ६१, ॐ इं इन्द्रायै नमः ६२, ॐ अं, अग्नि जिह्वायै नमः ६३, ॐ यं यम्यै नमः ६४, ॐ निं निऋतये नमः ६५, ॐ वं वारूण्यै नमः ६६, ॐ वां वायव्यै नमः ६७, ॐ सौं सौम्यायै नमः ६८, ॐ रुं रुद्रायै नमः ६९,, ॐ ब्रां ब्रह्माण्यै नमः ७०, ॐ ह्रिं शेषिण्यै नमः ७१, ॐ वं वज्रिण्यै नमः ७२, ॐ दं दण्डियै नमः ७३, ॐ खं खड्गिन्यै नमः ७४, ॐ पां पाशिन्यै नमः ७५, ॐ अं अङ्कुशिन्यै नमः ७६, ॐ गं गदिन्यै नमः ७७, ॐ त्रिं त्रिशुलिन्यै नमः ७८, ॐ पं- पद्मिन्यै नमः ७९, ॐ चं चक्रिण्यै नमः ८०, ॐ गं गणनाथिन्यै नमः ८१, ॐ क्षें क्षेत्रपालिन्यै नम; ८२, ॐ वं वटुकिन्यै नमः ८३, ॐ यों योगिनीभ्योनमः ८४,
इति पूजयित्वा धूपं, दीपं, नैवेद्यं, ताम्बूलं, दक्षिणां समर्प्य नीराजनञ्च कुर्यात् ।

विधि निर्देषः-८४ कोठाका प्रत्येक कोठामा ईशानादि क्रमले प्रतिष्ठा र आवाहनपूर्वक अधिदेव, प्रत्यधिदेवताहरूको पूजा गर्नु -

प्रयोग : -

पुनश्चतुरशीति प्रतिकोष्ठेषु ईशानादितोऽधिदेवप्रत्यधिदेवानां पूजनम् सर्व पूर्ववत् । ॐ गणेशाय नमः १, ॐ दुर्गायै नमः २, ॐ वायवे नमः ३, ॐ आकाशाय नमः ४, ॐ अश्विनीकुमाराभ्यां नमः ५, ॐ इन्द्राय नमः ६, ॐ अग्नये नमः ७, ॐ धर्माय नमः ८, ॐ निर्ऋतये नमः ९, ॐ वरुणाय नमः १०, ॐ पवनाय नमः ११, ॐ कुवेराय नमः १२, ॐ ईशानाय नमः १३, ॐ ब्रह्मणे नमः १४, ॐ अनन्ताय नमः १५, ॐ ध्रुवाय नमः १६, ॐ अध्वराय नमः १७, ॐ सोमाय नमः १८, ॐ अद्भ्यो नमः १९, ॐ अनिलाय नमः २०, ॐ अनलाय नमः २१, ॐ प्रत्यूशाय नमः २२, ॐ प्रभासाय नमः २३, ॐ धात्रे नमः २४, ॐ अर्यम्णे नमः २५, ॐ मित्राय नमः २६, ॐ वरुणाय नमः २७, ॐ भगाय नमः २८, ॐ इन्द्राय नमः २९, ॐ विवस्वते नमः ३०, ॐ पूष्णे नमः ३१, ॐ पर्जन्याय नमः ३२, ॐ अंशवे नमः ३३, ॐ त्वष्ट्रे नमः ३४, ॐ विष्णवे नमः ३५, ॐ वीरभद्राय नमः ३६, ॐ शम्भवे नमः ३७, ॐ गिरिशाय नमः ३८, ॐ अजैकपदे नमः ३९, ॐ अहिर्बुध्न्याय नमः:

४०, ॐ पिनाकिने नमः ४१, भुवनाधिपाय नमः ४२, ॐ कपालिने नमः ४३, ॐ वृषाकपये नमः ४४, ॐ स्थाणवे नमः ४५, ॐ भगाय नमः ४६, ॐ गौर्यै नमः ४७, ॐ पद्मायै नमः ४८, ॐ शच्यै नमः ४९, ॐ मेधायै नमः ५०, ॐ सावित्र्यै नमः ५१, ॐ विजयायै नमः ५२, ॐ जयायै नमः ५३, ॐ देवसेनायै नमः ५४, ॐ स्वधायै नमः ५५, ॐ स्वाहायै नमः ५६, ॐ मात्रे नमः ५७, ॐ लोकमात्रे नमः ५८, ॐ धृत्यै नमः ५९, ॐ पुष्ट्यै नमः ६०, ॐ तुष्ट्यै नमः ६१, ॐ कुलदेवतायै नमः ६२, ॐ गणेशाय नमः ६३, ॐ आवहाय नमः ६४, ॐ प्रवहाय नमः ६५, ॐ उद्वाहाय नमः ६६, ॐ शंवहाय नमः ६७, ॐ विवहाय नमः ६८, ॐ परावहाय नमः ६९, ॐ परिवहाय नमः ७०, ॐ ब्रह्मणे नमः ७१, ॐ विष्णवे नमः ७२, ॐ रुद्राय नमः ७३, ॐ अकार्य नमः ७४, ॐ वनस्पतये नमः ७५, ॐ सूर्याय नमः ७६, ॐ चन्द्राय नमः ७७, ॐ भौमाय नमः ७८, ॐ बुधाय नमः ७९, ॐ गुरवे नमः ८०, ॐ शुक्राय नमः ८१, ॐ शनैश्चराय नमः ८२, ॐ राहवे नमः ८३, ॐ केतवे नमः ८४, इति पूजाविधाय धूपदीपनैवेद्यादिकं च समर्पयेत् ।

विधि निर्देष. - त्यसपछि ८४ थालीमा सूर्यका निम्नलिखित १२ नाम ७ पटक आवृत्ति (दोहोऱ्याएर) गरी सूर्यको पूजा गरेपछि धूप, दीप, नैवेद्य आदि अर्पण गर्नू ।

विशेष - सूर्यका १२ नाम ७ पटक दोहोऱ्याई-दोहोऱ्याई पूजा गर्दा ८४ थालीमा पूजा सम्पन्न हुन्छ। ७ लाइ १२ ले गुणन गर्दा ८४ हुन्छ। यसैगरी प्राणप्रतिष्ठा र आवाहनपूर्वक अश्विनी आदि २८ नक्षत्रहरूको तीन आवृत्त गरी ८४ थालीमा नाममन्त्रले पूजा गर्नुपर्छ। ३ लाई २८ ले गुणन गर्दा ८४ हुन्छ।

प्रयोग -

पुनश्चतुरशीति प्रतिस्थालीषु सूर्यस्य द्वादशनामभिः सप्तावृत्या पूजयेत् - **ॐ अर्यम्णे नमः १, ॐ मित्राय नमः २, ॐ वरुणाय नमः ३, ॐ इन्द्राय नमः ४, ॐ विवस्वते नमः ५, ॐ त्वष्ट्रे नमः ६, ॐ अंशवे नमः ७, ॐ भगाय नमः ८, ॐ पुष्णे नमः ९, ॐ पर्जन्याय नमः १०, ॐ धात्रे नमः ११, ॐ विष्णवे नमः १२,** इति संपूज्य धूपदीपादिकं कुर्यात्। एवमश्विन्यादि, अष्टाविंशतिनक्षत्रैस्त्रिरावृत्या पूजनादिकमं चरेत्।

चन्द्रपूजनम्

सहस्रचन्द्रपूजनविधि :-

संकल्पपूर्वक दियो बालेर स्वस्तिवाचन, पञ्चगव्य निर्माण, कर्मपात्र सम्पादन, अर्घसम्पादन, यथावश्यक ब्राह्मणवरण, पुण्याहवाचन, दियो-कलश-गणेशपूजा, ग्रहपूजा, मातृका पूजा, नान्दी श्राद्ध गरेपछि सहस्र चन्द्रमाको पूजा गर्नुपर्दछ।

चन्द्रपूजनक्रम :-

असल धान का सग्ला एवं राम्रा चामलका चन्द्रमातुल्य सेता हजार संख्या थुप्रा लगाउनू। ती थुप्रामाथि चाँदीको कलश, कलशामाथि चाँदीकै थाली राखेर सोह्र मासा परिमाणका चन्द्रमा जस्तै सेता सोहकला युक्त चाँदी का प्रतिमा स्थापना गर्नु।

माझमा चामलमाथि गाईका दूधले भरिएको एउटा चाँदीको कलश स्थापना गरी त्यसमाथि चाँदीको थालीमा चन्द्रमाको प्रतिमा राख्नू। त्यस चन्द्रकलशका चार कोणमा चार कलश स्थापना गर्नू र तिनमाथि चार थाली र ती थालीमा एक-एक प्रतिमा राख्नू। भएसम्म ती कलशहरू पनि दूधले भर्नू, नभए अरू जल राखेर अलिकति दूध मिसाउनू। तीचारकलश बाहिर सोह्र कलश स्थापना गरी तिनमा पनि चाँदीका प्रतिमा राख्नू।

चौराशी०

ती सोह्र कलश बाहिर सेता चामलका ९७९ बेदी बनाएर तिनमा पनि भए चाँदीका कलश र प्रतिमा नभए ९७९ माटाका कलशमा या दूना, बोहताहरूमा जल राखेर प्रतिमास्वरूप चाँदीका टुक्रा अथवा पैसा राख्नू । सकिन्न भने पहिले भनिएका १६ कलशहरू पनि माटाकै प्रयोग गर्नू ।

पहिले स्थापना गरिएका माझको कलशमा चन्द्रप्रतिमाको प्राणप्रतिष्ठा गर्नू । त्यसपछि आफ्नो शरीरशुद्धिका निम्ति १५ पटक ॐ जप्नू । अब षोडसोपचारले चन्द्रहरि (चन्द्रमा) को पूजा गर्नू ।

आदौ विनियोग : (प्राणप्रतिष्ठा) -

अस्य श्रीप्राणप्रतिष्ठामन्त्रस्य ब्रह्मविष्णुमहेश्वरा ऋषयः ऋग्यजुः सामानि छन्दांसि जगत्सृष्टि प्राणशक्तिर्देवताआं बीजम् ह्रीं शक्तिः क्रीं कीलकम् प्राणप्रतिष्ठापने विनियोगः । ततः प्राणप्रतिष्ठादक्षिणहस्तांगुलीभिः प्रतिमां स्पृष्ट्वा इमानि मन्त्राणि पठेत् । अस्यै प्राणः प्रतिष्ठन्तु अस्यै प्राणाः क्षरन्तु च । अस्यै देवत्वसंज्ञायै नमः ।। ॐ मनोजूतिर्जूषतमाज्यस्य बृहस्पतिर्यज्ञमिमन्तनोत्वरिष्टं यज्ञऽसमिमन्दधातु । विश्वेदेवास इह मादयन्तामों३ प्रतिष्ठ । ॐ आं ह्रीं क्रीं यं रं लं वं शं षं सं हं सः सोऽहम् प्राणः । ॐ आं ह्रीं क्रीं यं रं वं शं षं सं हं सः - जीव इह

स्थित इति । तत एकादशेन्द्रियन्यासं च प्रतिमायामेव कुर्यादनेन मन्त्रेण ॐ आं ह्रीं क्रीं यं रं लं वं शं शं सं हं सः सर्वेन्द्रियाणि वाङ्मनस्त्वकचक्षुः श्रोत्रजिह्वाघ्राणवाक्पाणिपाद- पायूपस्थानीहैवागत्य सुखं चिरं तिष्ठन्तु स्वाहा । ततः कलान्यासः । अनेन मन्त्रेण । ॐ भूर्भुवः स्वः यमुनातीरोद्भव आत्रेयगोत्र शुक्लवर्ण सम्पूर्णषोडशकल सोम इहागच्छ इत्यावाह्य दक्षिणहस्ताङ्गुलीभिरेव प्रतिमां सर्वतः स्पृशन् इमं मत्रं च पठेत् । ॐ इमं देवा असपत्न ᳪ सुवध्वं महते क्षेत्राय महते ज्यैष्ठ्याय महते जानराज्यायेन्द्रस्येन्द्रियाय । इमममुस्य पुत्रममुष्यै पुत्रमुस्यै विश एष वोऽमी राजा सोमोऽस्माकं ब्राह्मणाना ᳪ राजा ।।इति ।।

विधि निर्देष -वेदीको माझमा सर्वतोभद्र स्थापना गरी सप्ताहमण्डपको विधिअनुसार कलशस्थापना, कलशमा वरूणको आवाहन र पूजनपछि त्यस कलशमाथि तामाको थालीमा **षोडसदल** लेखेर त्यसमा रोहिणी सहित चनद्रमाको तीन पल परिमाणको प्रतिमा (अग्निमा तताएर शुद्ध) स्थापना गरी **मनोजूति०** ले प्राणप्रतिष्ठा, **चन्द्रमा मनसो०** ले न्यासगरी निम्नलिखित विधिअनुसार पूजा गर्नुपर्छ -

प्रयोग : - ततो मध्यवेद्यां सर्वतोभद्रं संस्थाप्य सप्ताहमण्डपविध्यनुसारेण सर्वतोभद्रमण्डलदेवान्संपूज्य तत्र धान्यतण्डूलयोरूपरिगोदुग्धपूरितं चित्रकलशं निधाय, **आजिघ्रकलशेति** मन्त्रेण वरूणमाह्य कलशे पूजयित्वा **तदुपरिषोडशदललिखितताम्रथाल्यां** रजतसुवर्णलिर्मितपलत्रयपरिमित रोहिणीसहितचन्द्रप्रतिमाया अग्न्युत्तारणं कृत्वा चन्दनाक्षतपुष्पाणि गृहीत्वा प्रतिमां **स्पृष्ट्वा मनोजूतिरिति** मन्त्रेण प्राणप्रतिरूष्ठां विधाय **ॐ चन्द्रमा मनस** इति मन्त्रेण चन्द्रकलान्यासं कृत्वा अत्र चन्द्रस्य वाक्पाणिपादपायूपस्थचस्क्षु: श्रोत्रघ्राणरसना त्वमनांसि, एकादशेन्द्रियाणि इहागच्छन्तु, इह तिष्ठन्तु यावत्पूजा करोमि तावत् यूयं सुस्थिरा: प्रसन्ना वरदा भवन्तु, **अथ न्यास:- चन्द्रदेहे** पुष्पादिना स्वदेहे तर्जन्यादिना **ॐ क्षीरपुत्राय हृदयाय नम: । ॐ विद्महे शिरसे स्वाहा, ॐ अमृततत्वाय शिखायै वषट् । ॐ धीमहि कवचाय हुम् । ॐ तन्नश्चन्द्र:, नेत्रत्रयाय वौषट् । ॐ प्रचोदयात् अस्त्राय फट् इति न्यस्य ॐ इमन्देवा०** इति सोममन्त्रमुदीरयेत् ।

अथ ध्यानम् - सपुष्पमञ्जलिं बद्ध्वा-

कुन्दकर्पूरसंकाशं श्वेतपद्माकरद्वयम् । एकास्यं द्वीक्षणं सौम्यं श्वेतांशुं मणिभूषितम् ।।

सप्तहस्तं विमानस्थं रोहिण्या सहितं स्मितम् । सशक्तिं सायुधं ध्यायेत्कलाषोडशभिर्युतम् ।।

इति ध्यायेत् । तत आवाहयेत् ।

आवाहनम् - आत्मसंस्थमजं शुद्धं त्वामहं परमेश्वर । अरण्यामिव हव्यांशं मूर्तावावाहयाम्यहम् ।।

स्थापनम् - तवेयं हि महामूर्त्तिस्तस्यां त्वां सर्वगः प्रभोः । भक्तिस्नेहसमाकृष्टं दीपवत्स्थापयाम्यहम् ।। इति स्थापयेत् ।

आसनम् - सर्वान्तर्यामिणे देव सुखासीनोऽक्षरात्मकः । प्रतिष्ठितो भवेश त्वं प्रसीद परमेश्वर ।।

इति रोहिणीसहितचन्द्राय नमः, आसनं समर्पयामि इति सर्वत्र योजयेत् ।

स्वागतम् - यस्य दर्शनमिच्छन्ति देवाः स्वाभीष्टसिद्धये । तस्मै ते परमेशाय स्वागतं स्वागतञ्च मे ।।

सुस्वागतम् - कृतार्थोऽनुगृहीतोऽस्मि सफलं जीवितं मम । आगतो देव! देवेश! सुस्वागतमिदं पुनः ।।

इति सुस्वागतमं कुर्यात् । ततः

पाद्यम् - यद्भक्तिलेशसंपर्कात्परमानन्दसंभवः । तस्मै ते चरणाब्जाय पाद्यं शुद्धाय कल्पये ।।

पाद्यजलं रोहिणीसहितचन्द्रमसे नमः ।

अर्घ्यम् - तापत्रयहरं दिव्यं परमानन्दलक्षणम् । तापत्रयविनिर्मुक्त्यै तवार्घ्यं कल्पयाम्यहम् ।।

आचमनीयम् - वेदानामपि वेदाय देवानां देवतात्मने । कल्पयामि वरं शुद्धं तोयन्ते शुद्धिहेतवे ।।

मधुपर्कम् - सर्वकालुष्यहीनाय परिपूर्णसुखात्मने । मधुपर्कमिमं देव ! कल्पयामि प्रसीद मे ।।

दधिघृतमधुसंमिलितं दद्यात् ।

पुनराचमनीयम् - उच्छिष्टोऽप्यशुचिर्वापि यस्य स्मरण मात्रतः ।

शुद्धिमाप्नोति तस्मै ते पुनराचमनीयकम् ।। इति पुनराचमनीयं समर्पयेत् ।

पञ्चामृतस्नानं तत्रादौ पयसा -

देवाद्यैर्वन्दिता धेनुः सर्वपापप्रणाशिनी । तत्क्षीरस्नापितो देव नित्यं मे वरदो भव ।।

इति पयःस्नानं समर्पयेत् । तत **आपोऽस्मान्निति** मन्त्रेण **शुद्धजलम्** ।

दधिस्नानम् - कामतोऽकामतो वापि यन्मया दुष्कृतं कृतम् । तत्सर्वं विलयं यातु दधिस्नानेन

कामद ।।

पुनः शुद्धोदकम् ।

घृतस्नानम् - रसानामुत्तममाज्यं देवानां च सदाप्रियम् । तेन त्वं स्नापितो देव निधिकान्तिप्रदा भव।।

पुनः शुद्धजलम् ।

मधुना - यस्य स्मरणमात्रेण तृप्तिं यान्ति पितामहाः । मधुना स्नापितो देव नित्यं शोकहरो भव ।।

पुनः शुद्धजलम् ।

शर्करया - यमलोकभयात्रस्तः शरणं त्वां गतः प्रभो ।
खण्डस्नानेन देवेश ! मां कुरूष्व सुखान्वितम् । पुनः शुद्ध - जलम् ।

जलेन - परमानन्दवोधाब्धिनिमग्ननिजमूर्तये । साङ्गोपाङ्गमिदं स्नानं कल्पयाम्यहमीश ! ते ।।

वस्त्रम् - मायाचित्रपटच्छन्ननिजगुह्योरुतेजसे । निवारणविज्ञानवासस्ते कल्पयाम्यहम् ।।

इति वस्त्रयुगलम् ।

उत्तरीयकम् - यमाश्रित्य महामाया जगत्संमोहिनी सदा ।

तस्मै ते परमेशाय कल्पयाम्युत्तरीयकम् । इत्युत्तरीयकम् ।

यज्ञोपवीतम् - यस्य शक्तित्रयेणैव संप्रीतमखिलं जगत् । यज्ञसूत्राय तस्मै ते यज्ञसूमत्रं प्रकल्पये ।।

आभूषणानि- स्वभावसुन्दराङ्गाय नानाश्क्त्याश्रयाय च ।

भूषणानि विचित्राणि कल्पयाम्यमरान्वित ।।

चन्दनम् - परमानन्दसौरभ्यपरिपूर्णदिगन्तरम् । गृहाण परमं गन्धं कृपया परमेश्वर ।।

पुष्पम् - मालाञ्च -

तुरीयवनसंभूतं नानागुणमनोहरम् । अमन्दसौरभं पुष्पं गृह्यतामिदमुत्तमम् ।।

अक्षता- अक्षतान्धवलान्देव गृहाण वरदर्षभ । देव देवोत्तमत्वं ! हि ह्यक्षयं कुरू मे फलम् ।।

षोडशोपचारपूजनमन्त्रा :-

प्रयोग: - ॐ सहस्त्रशीर्षापुरुष: सहस्त्राक्ष:सहस्त्रपात् । सभूमिंसर्व्वतस्पृत्वात्य तिष्ठद्दशाङ्गुलम् ।।

ॐ पुरुषएवेदंसर्व्वंय्यद्भूतंय्यच्चभाव्यम् । उतामृतत्वस्येशानोयदन्नेनातिरोहति ।। ॐ

एतावानस्य-महिमातोज्ज्यायाँश्चपूरुषः । पादोस्यव्विश्वाभूतानित्रिपादस्यामृतन्दिवि ।। ॐ त्रिपादू-
 द्धर्वऽउदैत्पुरुषःपादोस्येहाभवत्पुनः।ततोव्विष्वङ्व्यक्क्रामत्साशनानशनेऽअभि।।ॐततोव्विरा
डजायतव्विराजोऽअधिपुरुषः । सजातोऽअत्यरिच्च्यतपश्चाद्धूमिमथोपुरः ।। ॐ
तस्माद्यज्ञात्सर्व्वहुतःसम्भृतम्पृषदाज्ज्यम् । पशूँस्ताँश्चक्क्रेव्वायव्यानारण्याग्ग्राम्म्याश्चये ।। ॐ
तस्माद्यज्ञात्सर्व्वहुतऽऋचःसामानिजज्ञिरे । छन्दाᳬसिजज्ञिरेतस्माद्यजुस्तत्स्मादजायत ।। ॐ
तस्मादश्श्वाऽअजायन्तयेकेचोभयादतः । गावोहजज्ञिरेतस्मात्स्माज्जाताऽअजावयः ।। ॐ
तंय्यज्ञम्बर्हिषिप्प्रौक्षन्पुरुषञ्जातमग्ग्रतः । तेनदेवाऽअयजन्तसाद्ध्याऽऋषयश्चये ।। ॐ
यत्पुरुषंव्यदधुः कतिधाव्यकल्प्पयन् । मुखङ्किमस्यासीत्किम्बाहूकिमूरूपादाऽउच्च्येते ।। ॐ
ब्राह्मणोस्यमुखमासीद्बाहूराजन्न्यः कृत । ऊरूतदस्ययद्वैश्श्यःपद्भ्याᳬशूद्रोऽअजायत ।। ॐ
चन्द्रमामनसोजात श्चक्षोःसूर्य्योऽअजायत । श्रोत्राद्वायु श्चप्राणश्च मुखादग्निरजायत।। ॐ
नाब्भ्याऽआसीदन्तरिक्षᳬशीर्ष्णोद्यौःसमवर्त्तत पदद्भ्याम्भूमिर्द्दिशः श्रोत्रात्थालोकाँ २।ऽअकल्प्पयन्
।। ॐ यत्पुरुषेणहविषादेवायज्ञमतन्वत । व्वसन्तोऽस्यासीदाज्ज्यङ्ग्रीष्मऽइध्मःशरद्धविः ।।

चौराशी० ॐसप्तास्यासन्परिधयस्त्रिः सप्तसमिधः कृताः । देवायद्यज्ञन्तन्वानाऽअबध्नन्पुरुषम्पशुम् ।। ॐ यज्ञेनयज्ञमयजन्तदेवास्तानिधर्म्माणिप्रथमान्यासन् ।
तेहनाकम्महिमानः सचन्तयत्रपूर्वेसाद्ध्यासन्तिदेवाः ।।

ततो नाम पूजा (षोडशनामभिश्चन्द्रपूजां कुर्यात्)

विधि निर्देष.- निम्नलिखित नामहरू उच्चारण गर्दै सम्भव भए षोडशोपचारले पूजा गर्नू, नभए यथाशक्ति उपचारले रोहिणीसहित चन्द्रमाको पूजा गर्नू -

प्रयोग:-

ॐ हिमांशवे नमः चन्दनाक्षतपुष्पाणि समर्पयामि १, एवं चन्द्रमसे नमः २,ॐ सोमाय नमः ३, ॐ विधवे नमः ४, ॐ कुमुदबन्धवे नमः ५, ॐ सुधांशवे नमः ६, ॐ ओषधीशाय नमः ७, ॐ अब्जाय नमः ८,ॐ मृगाङ्काय नमः ९, ॐ कलानिधये नमः १०, ॐ नक्षत्रेशायः नमः ११, ॐ निशापतये नमः १२, ॐ जैवातृकाय नमः १३, ॐ द्विजराजाय नमः १४, ॐ शुभ्रांशवे नमः १५, ॐ क्षपाकराय नमः १६,

विधि निर्देष.- पूर्वादिक्रमले थालीका वरिपरि नवग्रहादिको र अठ्ठाईस नक्षत्रहरूको पूजा गर्नू ।

अथावरणपूजा -

पूर्वादिक्रमेण नवग्रहपूजा - ॐ आदित्याय नमः, चन्दनाक्षतपुष्पाणि समर्पयामि ।।१।। एवं ॐ भौमाय नमः ।।२।। ॐ बुधाय नमः ।।३।। ॐ शनये नमः ।।४।। ॐ वृहस्पतये नमः ।।५।।ॐ राहवे नमः ।।६।। ॐ शुक्राय नमः ।।७।। ॐ केतुभ्योनमः।।८।। ततः षोडशपत्रेषु चन्द्रस्य षोडशकलाः पूर्वादिक्रमेण पूजयेत् -ॐ अमृतायै नमः ।।१।। ॐ मानदायै नमः ।।२।। ॐ पूषायै नमः ।।३।। ॐ तुष्ट्यै नमः ।।४।। ॐ पुष्ट्यै नमः ।।५।। ॐ रत्यै नमः ।।६।। ॐ धृत्यै नमः ।।७।। ॐ शशिन्यै नमः ।।८।। ॐ चन्द्रिकायै नमः ।।९।। ॐ क्रान्त्यै नमः ।।१०।। ॐ ज्योत्स्नायै नमः ।।११।। ॐ श्रियै नमः ।।१२।। ॐ प्रीत्यै नमः ।।१३।। ॐ अंगदायै नमः ।।१४।। ॐ पूर्णायै नमः ।।१५।। ॐ पूर्णामृतायै नमः ।।१६।।

ततोऽष्टाविंशति विन्दुषु पूर्वादिक्रमेण नक्षत्राणि पूजयेत् - ॐ रोहिण्यै नमः गन्धाक्षतपुष्पाणि समर्पयामि ।।१।।ॐ मृगशीर्षे नमः ।।२।। ॐ आर्द्रायै नमः ।।३।। ॐ पुनर्वसवे नमः ।।४।। ॐ तिष्याय नमः ।।५।। ॐ अश्लेषायै नमः ।।६।। ॐ मघायै नमः ।।७।। ॐ पूर्वाफाल्गुन्यै नमः ।।८।। ॐ उत्तराफल्गुन्यै नमः ।।९।। ॐ हस्ताय नमः ।।१०।। ॐ चित्राय नमः ।।११।। ॐ स्वात्यै ।।१२।। ॐ विशाखायै नमः ।।१३।। ॐ अनुराधायै नमः ।।१४।। ॐ ज्येष्ठायै नमः ।।१५।। ॐमूलाय नमः ।।१६।। ॐ पूर्वाषाढायै नमः ।।१७।।

चौराशी० ॐ उत्तराषाढायै नमः ।।१८।। ॐ अभिजिते नमः ।।१९।। ॐ श्रणाय नमः ।।२०।। ॐ धनिष्ठायै नमः ।।२१।। ॐ शतभिषजे नमः ।।२२।। ॐ पूर्वाभाद्रपदायै नमः ।।२३।। ॐ उत्तरभाद्रपदायै नमः ।।२४।। ॐ रेवत्यै नमः ।।२५।। ॐ अश्विन्यै नमः ।।२६।। ॐ भरण्यै नमः ।।२७।। ॐ कृत्तिकायै नमः ।।२८।। इति आवरणपूजां विधाय रोहिण्यै सिन्दूरादिसौभाग्यद्रव्याणि समर्पयेत् - **ॐ अभिष्टसिद्धिं मे देहि शरणागत वत्सल । भक्तया समर्पये तुभ्यं समस्ता वरणार्चनम् ।।** इति पुष्पाञ्जलिं दद्यात् ।

धूपम् - **वनस्पति रसोद्भूतो गन्धाढयः सुमनोहरः । आघ्रेयः सर्वदेवानां धूपोऽयं प्रतिगृह्यताम् ।।**

ॐ ब्राह्मणोऽस्य मुखमासीद्बाहू राजन्यः कृतः । ऊरूतदस्य यद्वैश्यः पद्भ्याᳫंशूद्रोऽअजायत ।।

दीपम्- सुप्रकाशो महान्दीपः सर्वतस्तिमिरापहः । सबाह्याभ्यन्तरं ज्योतिर्दीपोऽयं प्रतिगृह्यताम् । ॐ चन्द्रमा मनसो जातश्चक्षोः सूर्योऽअजायत ।श्रोत्राद्वायुश्च प्राणश्चमुखादग्निरजायत ।।

नैवेद्यम्- सत्पात्रसिद्धसुहविर्विविधानेकभक्षणम् ।निवेदयामि देवेश सानुगाय गृहाण तत् ।।

ॐ नाभ्या आसीदन्तरिक्षᳫंशीर्ष्णोद्यौः समवर्तत ।

पद्भ्यांभूमिर्दिशः श्रोत्रात्तथालोकाँ२ऽअकल्पयन् ।।

चौराशी० आचमनीयम् - गङ्गा च यमुना चैव नर्मदा च सरस्वती । ताभ्यो जलं मयानीतं पुनराचमनीयकम् ।।

ॐ यत्पुरुषेण हविषा देवायज्ञमतन्वत । वसन्तोस्यासीदाज्यङ्ग्रीष्मऽइध्मः शरद्धविः ।।

ताम्बूलम् - पूगीफलं सताम्बूलं खदिरादिमनोहरम् । कर्पूरादिसमायुक्तं ताम्बूलं प्रतिगृह्यताम् ।।

फलम् - इदं फलं मया देव स्थापितं पुरतस्तव । तेन मे सफलावाप्तिर्भवेज्जन्मनि जन्मनि ।।

सुगन्धद्रव्यम् - संसारार्णवमग्नञ्च पाहि मां रोहिणीपते । सुगन्धं च सुरश्रेष्ठ! गृहाण परमेश्वर! ।।

हिरण्यम् - हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः । अनन्तपुण्यफलदमतः शान्तिं प्रयच्छ मे ।।

सहस्रसङ्ख्याकं तिलयवाक्षतादिकम् (गनौटा) -

इति वर्तिपुष्पतण्डुलतिलयवाक्षतादिसहस्रसङ्ख्याकं संकल्पपूर्वकं समर्पयेत् ।

सकर्पूरं नीराजनम्-

यज्ज्योतिः सर्वदेवानां तेजसां तेज उत्तमम् । आत्मज्योतिः परंधाम दीपोऽयं

प्रतिगृह्यताम् ।

दर्पणम् - दर्शनेन त्वमादर्श नूनं मङ्गलदायक । शौर्यसौभाग्यसत्कीर्तिनिर्मल ज्ञानदो भव ।।

चामरम् - शशाङ्ककरसङ्काशं हिमडिण्डिरपाण्डुरम् । प्रोत्सारयाशु दुरितं चामरामरवल्लभ ।।

प्रदक्षिणा - यानि कानि च पापानि जन्मान्तरकृतानि च । तानि सर्वाणि नश्यन्तु प्रदक्षिणपदे पदे ।।

नमस्कारः - नमः शुभ्रांशवे तुभ्यं द्विजराजाय ते नमः।रोहिणीपतये तुभ्यं लक्ष्मीभ्रात्रे नमोऽस्तु ते।।

स्तुतिः - हिमांशवे नमस्तुभ्यं सोमचन्द्राय वै नमः । चन्द्राय विधवे नित्यं नमःकुमुदबन्धवे ।।१।।

सुधांशवे च सोमाय ओषधीशाय वै नमः । नमोऽब्जाय मृगाङ्काय कलानां निधये नमः।।२।।

नमो नक्षत्रनाथाय शर्वरीपतये नमः । जैवातृकाय सततं द्विजराजाय वै नमः ।।३।। इति ।

शङ्खाऽर्घ्य निवेदनम्-

नमस्ते मासमासान्ते जायमानः पुनः पुनः ।

गृहाणार्घ्यं शशाङ्क त्वं रोहिण्या सहितो मम ।। इति सपुष्पफलचनदनशङ्खतोयं चन्द्राय

समर्पयेत् । अर्घ दिएपछि सोमसूक्तले र पुराणका मन्त्रहरूले सोमको स्तुति गर्नू ।

सोमसूक्तम्

आप्यायस्व मदिन्तम सोम विश्वेभिरꣳशुभिः ।।
भवा नः सप्रथस्तमः सखा वृधे ।।
सं ते पयाꣳसि समु यन्तु वाजाः सं वृष्ण्यान्यभिमातिषाहः ।
आप्यायमानो अमृताय सोम दिवी श्रवाꣳस्युत्तमानि धिष्व ।।
या ते धामानि हविषा यजन्ति ता ते विश्वा परिभूरस्तु यज्ञम् ।
गयस्फानः प्रतरणः सुवीरोऽवीरहा प्रचरा सोम दुर्यान् ।।
सोमो धेनुꣳ सोमो अर्वन्तमाशुꣳसोमो वीरं कर्मण्यं ददाति ।
सादन्यं विदथ्यꣳसभेयं पितृश्रवणं यो ददाशदस्मै ।।
अषाढं युत्सु पृतनासु पप्रिꣳस्वर्षामप्सां वृजनस्य गोपाम् ।
भरेषुजाꣳसुक्षितिꣳ सुश्रवसं जयन्तं त्वामनु मदेम सोम ।।

त्वमिमा औषधीः सोम विश्वास्त्वमपो अजनयस्त्वं गाः ।
त्वमा ततंथोर्वन्तरिक्षं त्वं ज्योति वितमो ववर्थ ।।
देवेन नो मनसा देव सोम रायो भागꣳसहसावन्नभि युध्य ।
मा त्वा तनदीशिषे वीर्यस्योभयेभ्यः प्रचिकित्सा गविष्टौ ।। इति सोमसूक्तम् ।

क्षमापनम् -

न्यूनातिरिक्तकर्माणि मया यानि कृतानि च । क्षमस्व तानि सर्वाणि ताराधिप ! नमोऽस्तु ते ।।१।।
मन्त्रहीनं क्रियाहीनं विधिहीनं सुरेश्वर । यत्पूजितं मया देव परिपूर्णं तदस्तु मे ।।२।।

इति क्षमापयेत् ।

अथलक्ष्मीनारायणपूजनम् -

विधि निर्देशः - माझमा कलशमाथि तामाको थालीमा तीन पल परिमाणको सुनको प्रतिमा लक्ष्मीनारायणको न्यासपूर्वक पूजा गर्नू । न्यास गर्दा आफ्नो शरीमा चोर औंला र साहिंली औंलाले गर्नू । देवतामा फूल, कुश आदिले न्यास गर्नू ।

चौराशी०

ततो मध्ये कलशपूजां विधाय तदुपरि ताम्रस्थाल्यां सुवर्णपलत्रयनिर्मित-लक्ष्मीनारायणप्रतिमाया अग्न्युत्तारणं कृत्वा तत्र निधाय ॐ **मनोजूतिरिति** प्राणप्रतिष्ठं विधाय न्यासं कुर्यात्- स्वदेहे **तर्जन्यनामिकाभ्यां देवतादेहे पुष्पादिना** ॐ विष्णवे नमः, वामकरे, ॐ माधवाय नमः, दक्षकरे, ॐ गोविन्दा नमः, वामपादे, ॐ कृष्णाय नमः, दक्षपादे, ॐ केशवाय नमः, वामजानुनी, ॐ श्रीपतये नमः, दक्षजानुनी, ॐ पद्मनाभाय नमः, वामकट्याम, ॐ हृषीकेशायः नमः, दक्षिणकट्याम्, ॐ वासुदेवाय नमः, नाभौ ॐ जगत्पत्ये नमः, हृदये, ॐ वैकुण्ठाय नमः, वामकुक्षौ, पुण्डरीकाक्षाय नमः, दक्षिणकुक्षौ इति । ॐ मधुसूदनाय नमः, कण्ठे, ॐ गोपतये नमः, वक्त्रे, ॐ दामोदराय नमः, नेत्रयोः, ॐ जगन्नाथाय नमः, शिरसि इति न्यासं विधाय ध्यानं कुर्यात् ।

ध्यानम् - योगेश्वराय देवाय योगिनां पतये विभो । योगोद्भवाय नित्याय गोविन्दाय नमो नमः ।।

आवाहनम् - पुरुषसूक्तेन ॐ सहस्रशीर्षेति०

आगच्छ भगवनदेव स्थाने चात्र स्थिरो भव । यावत्पूजां करिष्यामि तावत्वं सन्निधौ भव ।।

आसनम् - ॐ पुरुषएवेदꣳ सर्वं यद्भूतंयच्चभाव्यम् । उतामृतत्वस्येशानोयदन्नेनातिरोहति ।।

नानारत्नसमायुक्तं कार्तस्वरविभूषितम् । आसनं देवदेवेश गृहाण पुरुषोत्तम ।।

आसनं समर्पयामि । श्रीलक्ष्मीनारायणाय नमः ।

चौंराशी० पाद्यम् - गङ्गादिसर्वतीर्थेभ्यो मयानीतं सुशोभनम् । तोयमेतत्सुखस्पर्शं पाद्यं मे प्रतिगृह्यताम् ।।

अर्घ्यम् - गन्धपुष्पसमायुक्तौ नानासौगन्ध्यशीतल: । मया निवेदितो भक्तया अर्घ्योऽयं प्रतिगृह्यताम् ।।

स्नानजलम् - गङ्गाजलं मयानीतं पवित्रं सुमनोहरम् । भक्त्यार्पितं सुरश्रेष्ठ गृहाण पुरुषोत्तम ।।

गङ्गासरस्वतीरेवापयोष्णीनर्मदाजलम् ।। तव स्नानार्थमानीतं गृहाण परमेश्वर ।

पुनराचमनीयम् - उच्छिष्टोप्यशुचिर्वापि यस्य स्मरणमात्रतः । शुचिमाप्नोति तस्मै ते पुनराचमनीयकम् ।।

पञ्चामृतस्नानम् - तत्रादौ दुग्धस्नानम् - ॐ पय: पृथिव्याम्पयओषधिषुपयोदिव्यन्तरिपेक्षेपयोधा: पयस्वती: प्रदिश: सन्तु मह्यम् ।

देवाद्यैर्वन्दिता धेनु: सर्वपापप्रणाशिनी । तत्क्षीरस्नापितो देव नित्यं च वरदो भव ।।

ततः शुद्धोदकेन

ॐआपोऽअस्मान्मातर: शुन्धयन्तु धृतेन नो घृतप्व:पुनन्तु । विश्वःहिरिप्रवहन्तिदेवीरुदिदाभ्य: शुचिरापूतऽएमि। दीक्षास्तपसोस्तनूरसि- तान्त्वा शिवाछंशग्मां परिदधे भद्रं वर्णम्पुष्यन् । ४१

दधिस्नानम् - ॐ दधिक्राव्णोऽअकारिषञ्जिष्णोरश्वस्यवाजिन: । सुरभिनो

मुखाकरत्त्रणऽ आयूꣳषितारिषत् ।

कामतोऽकामतो वापि यन्मया पूर्वसञ्चितम् । तत्सर्वं विलयं यातु दधिस्नानेन केशव ।

पुनर्जलेन ।

घृतस्नानम्- ॐ घृतम्मिमिक्षेघृतमस्ययोनिर्घृतेश्रितोघृतम्वस्यधाम । ।
अनुस्वधमावहमादयस्वस्वाहाकृतंवृषभवक्षिहव्यम् ।

रसानामुत्तममाज्यं देवानाञ्च सदा प्रियम् । तेन त्वं स्नापितो देव निधिकान्तिप्रदो भव ।

पुर्नजलेन ।

मधुस्नानम् - ॐ मधुव्वाता ऋतायतेमधुक्षरन्ति सिन्धवः माध्वीर्न्नः सन्त्वोषधीः । मधुक्तमुतोषसो मधुमत्पार्थिवꣳरजः । मधुद्यौरस्तुनः पिता।। मधुमान्नो वनस्पतिर्मधुमाँ२ऽअस्तुसूर्यः माध्वीर्गावोभवन्तुनः ।

यस्य स्मरणमात्रेण तृप्तिं यान्ति पितामहाः । मधुना स्नापितो देव नित्यं शोकहरो भव ।

पुर्नजलेन ।

शर्करास्नानम् - यमलोकभयात्त्रस्तः शरणं त्वां गतः प्रभो ।

खण्डस्नानेन देवेश मां कुरुष्व सुखान्वितम् ।। पुनः जलेन आपोऽअस्मान्निति ।

 वस्त्रयुगलम् - पीताम्बरयुगं देव सर्वकामार्थसिद्धये । मया निवेदितं भक्त्या गृहाण सुरसत्तम ।।

यज्ञोपवीतम् - दामोदर !नमस्तेऽस्तु त्राहि मां भवसागरात् । ब्रह्मसूत्रं सोत्तरीयं गृहाण पुरुषोत्तम ।।

गन्धम् - श्रीखण्डचन्दनं दिव्यं गन्धाढ्यं सुमनोहरम् । विलेपनं सुरश्रेष्ठ प्रीत्यर्थं प्रतिगृह्यताम् ।।

तिलयवाक्षताः - धान्यराजाः स्वमाङ्गल्या विष्णुप्रीतिकरा यवाः ।

तस्मादेषां प्रदानेन ममास्त्वविकलं फलम् ।

पुष्पम्, माल्यम् - श्रीश्चते०

नानाविधानि पुष्पाणि नानाक्षेत्रोद्भवानि च । तुलसीदलमिश्राणि अर्पितानि रमापते ।

अङ्गपूजाः - ॐ कृष्णाय नमः पादौ पूजयामि, ॐ केशवाय नमः, गुल्फौ पूजयामि, कंसारये नमः, जानुनी पू., वामनाय नमः, कटिं पू.,अच्युताय,नमः-हृदयं पू०:, माधवाय नमः, कण्ठं पू. ॐ रामाय नमः, बाहूं पू. ॐ नृसिंहाय नमः, मुखं पू., ॐ वाराहाय नमः, नासिके पू., ॐ विष्णवे नमः नेत्रे पू. ॐ शार्ङ्गिणे नमः, ललाटं पू., ॐ मुरारये नमः शिरः पू., ॐ लक्ष्मीनारायणाय नमः सर्वाङ्गं पूजयामि । ततो लक्ष्मीप्रीतये सिन्दूरादिसौभाग्यभूषणानि वस्त्रं च

निवेदयेत् । धूपं, दीपं, अपूपादि नैवेद्यं दत्वा ।

चौराशी० कर्पूरजलम् - यत्पुरुषेणेति ०

कर्पूरवासितं तोयं गङ्गायास्तु समाहृतम् । आचम्यतां मया दत्तं लक्ष्मीनारायणप्रभो ।

ताम्बुलनारिकेलपूगीफललवङ्गादीनि च समर्पयेत् ।

दक्षिणाद्रव्यम् - हिरण्यगर्भ इति । चामरम, आदर्शनम् समर्प्य यथाशक्ति जपं कृत्वा नीराजनं कुर्यात् ।

सङ्ख्याकृत (गनौटा) वस्तुवर्तिपुष्पादिकमं सङ्कल्प्य निवेदयेत् ।

कर्पूरारार्तिकम् - ॐ आरात्रिपार्थिव० इति ।

सूर्येन्दुतारकावह्नितेज : पुंज विराजितम् कर्पूरदीपं देवेश प्रतिगृह्ण सुरेश्वर ।।

मन्त्रपुष्पाञ्जलि : - ॐ यज्ञेन यज्ञमयजन्त इत्यादि............ पुष्पाञ्जलिं समर्पयामि लक्ष्मीनारायणाय नमः, ॐ तनूपा अग्ने इति, आरार्तिकं तापयेत् । प्रदक्षिणा यानि कानि० इति ।

विशेषार्घ्यम् - फलान्नं चैव शुभ्रं च भक्तियुक्तेन चेतसा । गृहाणार्घ्यं मयादत्तं लक्ष्म्यासह जगद्गुरो ।।

क्षमापनम् - अज्ञानाद्विस्मृतेर्भ्रान्त्या यन्न्यूनमधिकं कृतम् । विपरीतन्तु तत्सर्वं क्षमस्व परमेश्वर ।।

मन्त्रहीनं क्रियाहीनं विधीहीनं सुरेश्वर । यत्पूजितं मया देव परिपूर्णन्तदस्तु मे ।। इति।

चौराशी० **सूचना -** यसपछि **कथाश्रवण** गर्नुपर्छ ।

विधि निर्देष. - त्यसपछि अग्निस्थापना विधिले होम समाप्त गरेपछि **इमन्देवा०** मन्त्रले सम्भव भए एक हजार आठ (१००८), नभए १०८, त्यो पनि नभए २८ संख्या पायस (खीर) को हवन गर्नू ।

आचार्यलाई - २५६ मुठीको पूर्णपात्र र शय्यादान गरी **यज्ञान्तगोदान, भूयसीदक्षिणा** गर्नू । माझका दुई कलश आचार्यलाई दिनू । त्यसपछि **गच्छ गच्छ०** पढेर अक्षता छर्की आवाहित देवताहरूको विसर्जन गर्नू ।

प्रयोग : - अथ अग्निस्थापनविधिना होमं समाप्य पायसं **इमन्देवा** इति मन्त्रेण चन्द्रस्य सति सम्भवे अष्टोत्तरसहस्रसंख्या अशक्तौ, अष्टोत्तरशतसंख्या वा अष्टाविंशति संख्या जुहुयात् । षट्पञ्चाशदधिकद्विशतमुष्टि परिमितं पूर्णपात्रं कृत्वा **द्विजदम्पति संपूज्य शय्यादानं कृत्वा,** आचार्याय दद्यात् । यावद्वर्षमहर्ब्राह्मणभोजनं कारयेत् । अथवा एकस्य जनस्य वर्षावधिभोजनाय पर्याप्तमन्नं तदहरेव ब्राह्मणाय दद्यात् ।

यज्ञान्तगोदानम् -

नमो गोभ्य इत्यादिना सालङ्कारां गां अथवा गोनिष्क्रयभूतदेयद्रव्यं वा संपूज्य **आकृष्णेनेति** देयब्राह्मणञ्च पूजयित्वा गोपूजनेन कर्मपात्रोदकेन **मनोमे तर्पयत** इत्यादिना स्वशिरस्यभिषिञ्च्य पितृदेवता: सन्तर्प्य सकुशोदकं गोपुच्छमादाय हरि: ॐ तत्सत् ३ विष्णु: ३ इत्यादि देशकालादीन्सङ्कीर्त्यंअद्यामुक गोत्रस्यामुकप्रवरस्य शुक्लयजुर्वेदान्तर्गतमाध्यन्दिनीयशाखाध्यायिनोऽमुकशर्मणो मम सपरिवारस्य सकुटुम्बस्यात्मन: श्रुतिस्मृतिपुराणोक्तफलप्राप्त्यर्थमेतज्जन्मपूर्वजन्मकृतनानाविधपापशान्त्यर्थं कृतस्य, आदौ दीपकलशगणेशादिपूजनपूर्वकपाठादिपूर्वाङ्गत्वादिप्रधानत्वेन सहस्रचन्द्रपूजनकर्मणि तथा चतुरशीतिसिद्धादीनां पूजनकर्मणि यथालब्धोपचारैर्यथाबुद्धिकृतपूजनहवनकर्मणो न्यूनातिरिक्तपतिपूर्णार्थं कृताकृतच्युताच्युतपूर्णापूर्णफलप्राप्तिद्वारा श्रीलक्ष्मीनारायणप्रीतये इमां गां सालङ्कारा रुद्रदैवत्याम, अमुकगोत्रायामुकशर्मणे सुपूजितायाचार्याय दातुमहमुत्सृजे तत्सत्र मम । **कपिले सर्वदेवानामिति** गोप्रार्थनां कृत्वा **दानप्रतिष्ठाद्रव्यं** सङ्कल्प्य दद्यात् । प्रतिग्रहिता **स्वस्तीति** गोदानं स्वीकृत्य **कोदात्** इत्यादि कामस्तुतिं पठेत् । ततो **भूयसीदक्षिणासङ्कल्पं** कुर्यात् । स्थापितपूजितकलशानपि सङ्कल्प्य ब्राह्मणेभ्यो दद्यात् । मध्यस्थकलशौ आचार्याय दद्यात् । तत: **यस्य स्मृत्या, कायेनवाचा०** इति पठेत् । **ततोऽक्षतान्विकिरन् गच्छ गच्छ,** इत्यादि पठेत्

यान्तु देवगणाः सर्वे पूजामादाय पार्थिवीम् । इष्टकामस्यसिद्ध्यर्थं पुनरागमनाय च ।।

चौराशी० इति पठित्वा आवाहितदेवान्विसर्जयेत् । ॐ **अच्युताय नमः** ३ इति पठेत् । ब्राह्मणाश्च यजमानस्याभिषेकं वैदिकमन्त्रै **रक्षाबन्धनं** च कुर्युः । इति शुभम् ।

पुनश्च - अवभृथस्नानं कृत्वा स्नानवस्त्रादीन् दीनानाथेभ्यो दद्यात् लौकिकव्यवहारञ्च परित्यजेत् ।

सहस्रचन्द्रपूजनफलम् (कथा)

नमस्कृत्य महादेवं लोकानां हितकाम्यया । सहस्रकृत्वः पूर्णेन्दु दर्शने विधिरुच्यते ।।१।।

सहस्रकृत्वः पूर्णस्य चन्द्रस्य दर्शनं भवेत् । यस्मिन्नब्दे दिने मासि जनानां देवरूपिणाम् ।।२।।

शुचौ देशे शोधयित्वा भूमिं प्रास्य कुशोदकैः । मण्डपं रचयेत्तत्र षोडशस्तम्भमण्डितम् ।।३।।

सहस्रपूर्णसङ्ख्येन ताम्रेण कलशानपि । कारयेत्पञ्च तत्रैव स्थापयेत् पञ्चपल्लवम् ।।४।।

मध्ये सुवर्णप्रतिमां लक्ष्मीनारायणस्य च । स्थापयित्वा वाहयित्वा पूजयेत्सुसमाहितः ।।५।।

भगवन् भूतभव्येश लक्ष्मीनारायण प्रभो । पूजितोऽसि महादेव क्षमस्व परमेश्वरः ।।६।।

इति पूजां समाप्याथ ब्राह्मणान्भोजयेत्सुधीः । सहस्रशः शतशोऽथ वित्तशाठ्यं विवर्जयेत् ।।७।।

एवं विधि समायुक्तो नरो भवति देवता । न तस्य पुनरावृत्तिर्विष्णुलोके महीयते ।।८।।

स्वेच्छया तन्मतो राजा चक्रवर्ती भवेन्नरः । धार्मिको ज्ञानवान् दीर्घजीवी शत्रुविवर्जितः ।।९।।

सहस्रपूर्णचन्द्रस्य पूजनन्तु समाचरेत् । मोहालस्यप्रमादेन यदि पूजां न कारयेत् ।।१०।।

वृथा जन्म भवेत्तस्य मालतीव वनान्तरे ।।११।।

विवादे परिवादे वा लोभे मत्सर एव वा । एतत्पूजां समाकृत्य व्यवहारे पतेद्यदि ।।१३।।

शुनो जन्म शतं प्राप्य शूकरत्वं प्रपद्यते । याजकोऽपि भवेन्मूर्खो लुब्धको ह्यविवेकतः ।।१४।।

य एतत् प्रातरुत्थाय समाहितमनाः सुधीः। पठेद्वा शृणुयात्पुण्यं कोटियज्ञफलं लभेत् ।।१५।।

-इति चतुरशीतिसिद्धसहस्रचन्द्रपूजनफलम् -

सूत उवाच -

एकदा चन्द्रमा स्वर्गे पितरं समपृच्छत । सर्वेलोकोः शोकरोगदोषग्रस्ता विचेतसः ।।१।।

जायन्ते च विपद्यन्ते तेषामुद्धरणं कथम् । प्रायश्चित्तं कथं तेषां परलोकोपकारकम् ।।२।।

कृतेन येन निरयान्न गच्छेरन्वदाधुना ।

अत्रिरुवाच-

श्रृणु पुत्र प्रवक्ष्यामि नृणामत्युपकारम् । कृतेन येन पापात्मा न गच्छेद्यमयातनाम् ।।३।।

एतदेव पुरास्कन्दो देवदारुवनान्तरे । कैलासे मलयावासे शङ्करं लोकशङ्करम् ।।४।।

पप्रच्छ विनयाक्रान्तं पितरं योगसागरम् । भगवन् मे कुरु दयां यदि दीनदयालुता ।।५।।

तदुपायं कथय मे लोकदुःखाकुलोऽस्म्यहम् । ऊर्ध्वं गच्छन्ति सत्त्वस्था मध्ये तिष्ठन्ति राजसाः।।६।।

वर्णाश्रमाचारहीना गच्छन्ति यमयातनाम् । तेषां पापार्दितानान्तु इहैव निष्कृतिर्यथा ।।७।।

शङ्कर उवाच -

भवेन्न यान्ति निरयान्कृत्वापि पातकं महत् । क्रौञ्चारे शृणुचात्यन्तं परं गोप्यं न कस्यचित् ।।८।।

मयाख्यातं परं स्कन्द त्वत्प्रेमवशतोऽधुना । वक्ष्ये मनुष्यैर्वेददाशीवर्षेऽतीते व्रतं चरेत् ।।९।।

महाव्रतमिति ख्यातं सिद्धव्रतमितीर्यते । चुतरशीतिसिद्धानां पूजनं क्रमतो भवेत् ।।१०।।

मध्यवेद्यां सिद्धपीठस्थापनं पूजनं क्रमात् । अनन्तकूर्मपीठाधो धर्मज्ञानादिकन्तथा ।।११।।

वैराग्यैश्वर्यकं पूज्यं पीठकोणान्तरं वहिः । मध्ये तत्र संविन्नाले महिद्यौर्भूमिशोधनम् ।।१२।।

पृष्ट्वा भूमिं भूरसीति धान्येति धान्यस्थापनम् । आजिघ्रेति हि मन्त्रेण कलशं स्थापयेत्पुनः ।।१३।।

तस्योपरि ताम्रपात्रं स्वर्णसिंहासनान्वितम् । चतुरशीतिसिद्धानां सुवर्णप्रतिमान्विताम् ।।१४।।
मनोजूतिरिति मन्त्रेण प्रतिष्ठाप्य यथाविधि । सिद्धपीठकोष्ठ वाह्ये ईशानक्रमतो न्यसेत् ।।१५।।
चत्वारश्चैव संपूज्याः शेषा मध्ये तु विन्यसेत् । मध्यकोष्ठं तु हर्यर्थ सर्वतोभद्रमण्डलम् ।।१६।।
तत्रैव निद्राकलशं पूर्वोक्तविधिना न्यसेत् । नारायणस्य प्रतिमां सलक्ष्मीकां तथात्मनः ।।१७।।
प्राणप्रतिष्ठाविधिना पाद्यार्घ्यावाहनादिभिः । सिद्धतोभद्रमालिख्य प्रागुत्तरक्रमेण हि ।।१८।।
कुर्याद्रिखा दश दश पूजयेन्नामतः क्रमात् । ऋद्धिर्वृद्धिस्तुष्टिः कान्तिर्दया पुष्टिः क्रियोन्नतिः ।।१९।।
क्षान्तिः शान्तिः क्षमा योगा शुभ्रा विद्युत्प्रभावती ।
सौरी चान्द्री कला मोघा सिद्धेती क्रमतः स्मृताः ।।२०।।
अशीतिकोष्ठे सिद्धान्दीन्पूर्वोक्तविधिना यजेत् । प्रणवादिचतुर्थ्यन्तैर्नमोन्तैर्मनुना युताम् ।।२१।।
सिद्धः सिद्धेश्वरः सिद्धसुखसिद्धश्च दर्शनः । महासिद्धः सिद्धदेवः सिद्धशास्त्रप्रवर्तकः ।।२२।।
सिद्धाचार्यो ज्ञानसिद्धः सिद्धभुक् सिद्धदक्षिणः । तीर्थसिद्धो योगसिद्धो भोगसिद्धश्चतुर्दश ।।२३।।
गुणसिद्धश्चन्द्रसिद्धो गणसिद्धश्च सिद्धकः । सिद्धसेनः सिद्धघटः सिद्धसूर्योऽनुसिद्धकः ।।२४।।

चौराशी०

सिद्धकाल: सिद्धकाम: सिद्धब्रह्मस्वरूपक: । सिद्धकर्ता सिद्धभर्ता सिद्धिद: सिद्धसाधक: ।।२५।।

सिद्धातिग:कलासिद्ध: सर्वसिद्ध: प्रसिद्धक:।सिद्धमान:सिद्धकल्प: सिद्धामृत: कलातिग: ।।२६।।

षट्त्रिंशत्सिद्धसिद्धपारश्च सिद्धनायक: ।सिद्धवल: स्वत: सिद्धोभयसिद्धैकसाधन : ।।२७।।

लोकोसिद्धो यज्ञसिद्ध: शुद्धसिद्धोऽवसिद्धक:।

वषट्सिद्ध: स्वस्तिसिद्धो भूतिसिद्धोऽधिसिद्धक: ।।२८।।

भव्यसिद्ध: पूतसिद्ध: शम्भूसिद्ध: सुसिद्धक: । दक्षसिद्धो रूपसिद्धो हंससिद्धो: प्रसिद्धक: ।।२९।।

विष्णुसिद्धो मुक्तसिद्ध: सिद्धक: सिद्धवाक तथा । सिद्धधामा: सिद्धतनु: सिद्धानन्द स्वरूपिणे ।।३०।।

पुण्यसिद्धो भुव: सिद्ध: स्वर्गसिद्ध: प्रदायक:।सिद्धमन्त्र:शान्तिसिद्ध: पुरूसिद्धो नियामक: ।।३१।।

हिरण्यसिद्धो वाकसिद्धस्तत्वसिद्धोऽतिसिद्धक:। सिद्धरत्न: सिद्धमाली सिद्धो वैकुण्ठरुपधृक ।।३२।।

सिद्धसेन: सिद्धसारो रुद्रसिद्धस्तथैव च । महामहामहासिद्धश्चतुरशीति संज्ञक : ।।३३।।

संपूज्य: प्रतिकोष्ठेषु सप्तावृत्या रविं न्यसेत् । अर्यमा मित्रावरुण इन्द्रश्चैव चतुर्थकम् ।।३४।।

विवस्ववांश्च तथा त्वष्टा विष्णुरंशुर्भगस्तथा।पूषा पर्जयन्तो धाता च माधव: क्रमतो यजेत् ।।३५।।

प्रतिकोष्ठं पूजयित्वा पूजां चन्द्रस्य तत्क्रमात् । अष्टविंशतिनक्षत्रैः प्रतिकोष्ठं त्रिवारकम् ।।३६।।

कृत्वा मध्यमकोष्ठेषु सर्वतोभद्रमण्डलम् । षट्पञ्चाशत्तत्रदेवानावाह्य क्रमशो यजेत् ।।३७।।

कर्णिकायां च कलशं निद्रासंज्ञं न्यसेत्पुनः । आजिघ्रकलशेत्युक्त्वा वरुणेति पठेदनु ।।३८।।

मध्ये नारायणः पूज्यः सश्रीको निजसूक्ततः । पूर्णादर्वीति मन्त्रेण तन्मुखे पूर्णपात्रकम् ।।३९।।

ताम्रस्थालीं साष्टदलां कृत्वा दिक्पालपूजनम् । ग्रहपूजां ततः कृत्वा साधिप्रत्यधिदैवतम् ।।४०।।

तद्विष्णोरिति मन्त्रेण तस्याग्रे स्वात्मबिम्बकम् ।पलत्रयमितं स्थाप्यं न्यासं कुर्यात् प्रयत्नत।।४१।।

वामे करे दक्षिणे च वामदक्षिणपादयोः । वामजानौ दक्षिणे च कट्योश्च दक्षवामयोः ।।४२।।

नाभौ तथैव हृदये कुक्षौ वामे च दक्षिणे । कण्ठे वक्त्रे नेत्रमूर्ध्नि षोडशाङ्गेषु नामभिः ।।४३।।

विष्णुर्माधवो गोविन्द कृष्णः केशवः श्रीपति : । पद्मनाभो हृषीकेशो वासुदेवो जगत्पति : ।।४४।।

वैकुण्ठः पुण्डरीकाक्षो मधुसूदनगोपती । दामोदरो जगन्नाथः क्रमादङ्गानि संस्पृशेत् ।।४५।।

अनुलोमविलोमेन ह्यङ्गपूजां पुनश्चरेत्। पादौ गुल्फौ जानुकटीहृत्कण्ठोदोर्मुखेषु च ।।४६।।

नासिकानेत्रभालेषु शिरसि विष्णुनामतः । कृष्ण केशव कंसारि वामनाच्युत माधवाः ।।४७।।

चौराशी०

रामनृसिंहवाराहास्तत्तत्स्थानेषु स्पृशेत्तथा । विष्णु शार्ङ्गी मुरारिश्च क्रमादेषोविधिः स्मृत : ।।४८।।

चतुरशीतिविप्राणां पूजनं कारयेत् पुनः । वस्त्रालङ्कारगन्धाद्यै रौप्यं गोदानकं चरेत् ।।४९।।

जन्मान्तरीयपापस्य तथैव चैहिकस्य च । प्रायश्चित्तमिदं प्रोक्तं तथैवागन्तुकस्य च ।।५०।।

कृत्वा व्रतमिदं जीवः कृतकृत्यो भवेद्भुवि । षाण्मातुर श्रुणु पुनः पापेषु नरमेत् क्वचित् ।।५१।।

असत्यं न वदेत्किंचिन्नाधर्मं चिन्तयेज्जनः । यद्यधर्मं प्रकुरुते सर्वं कुञ्जरशौचवत् ।।५२।।

सूत उवाच -

श्रुत्वा शङ्करवाक्यन्तद्गुह्यं प्रपच्छ सादरम् ।शृणु शौनक वक्ष्यामि सेतिहासं कथानकम् ।।५३।।

स्कन्द उवाच -

श्रुणु स्कन्द प्रवक्ष्यामि गोप्याद्गोप्यतरं परम् । यस्य श्रवणमात्रेण प्रायश्चित्तं प्रजायते ।।५४।।

नर्मदातीरनगरे माहिष्मत्यां पुरा किल । ब्राह्मणो ब्रह्मवर्चस्वी ज्ञानवान् धार्मिकः कृति ।।५५।।

कदाचित्संगदोषेण रागान्धो धर्मवर्जितः । अकृत्याचरणे शक्तो मांसभुक्, मद्यप :सदा।।५६।।

सर्वगामी सर्वभक्षी कौलधर्मपरायणः । एवं तस्य गताहानि चतुरशीतिवत्सरम् ।।५७।।

चौराशी० एकदा नर्मदातीरे ब्राह्मणा वेदपारगाः । सिद्धव्रतं मुदा चक्रुः शिवशर्मा समागतः ।।५८।।

तस्य प्राचीनमित्रं च श्रीशर्माणं द्विजोत्तमम् । दृष्वा मित्रं प्रत्युवाच कस्मादागतवान् भवान् ।।५९।।

वाक्यं श्रीशर्मणः श्रुत्वा भूत्वा किञ्चिदवाङ्मुख । पुण्यात्मनो दर्शनाद्वै स्पर्शनान्मननादपि ।।६०।।

शुद्धान्त;करणो जातो रुरोद मित्रसन्निधौ । उवाच किमु वक्तव्यं ह्यकर्तव्यं मया कृतम् ।।६१।।

कथं मे निष्कृतिर्भूयान्मज्जेऽहं नरकेऽशुभे । उद्धारं कुरु मे वन्धो प्राश्चित्तं कथं भवेत् ।।६२।।

उवाच वद मे दीने दयाऽस्ति त्वं कृपां कुरु । वचनं शिवदत्तस्य श्रुत्वा खेदसमन्वितः ।।६३।।

श्रीशर्मा समुवाचाथ निर्हेतुकृपयान्वितः । संवत्सरं कति जातं ब्रह्मन् वद तवाधुना ।।६४।।

चतुरशीतिवर्षेऽहमब्रवीत्तं मुदा तदा । श्रीशर्मा प्रत्युवाचेदं कुरु सिद्धव्रतं भवान् ।।६५।।

इत्युक्ते वरयित्वा तं चकार व्रतमुत्तमम् । तद्व्रतस्य प्रभावेण मुक्तोऽभूत्स च पातकात् ।।६६।।

दिव्यवर्ष तपस्तप्त्वा परमां गतिमाययौ । यः श्रृणोति परं भक्त्या पठेद्वा सुसमाहितः ।।६७।।

स्वर्गमोक्षप्रदं धन्यं स गच्छेद् परमं पदम् ।।

इति श्रीरुद्रयामले सिद्धभागे व्रतखण्डे सिद्धव्रतं नाम पञ्चाशीतितमोऽध्यायः ।

गते वर्षद्वये सार्धे पञ्चपक्षे दिनद्वये । दिवसस्याष्टमे भागे पतत्येकोऽधिमासकः ।।५६।।

त्र्यधिके वा अशीत्यब्दे चतुर्मासयुते ततः । भवेच्चन्द्रसहस्रन्तु तावज्जीवति यो नरः ।

उद्यापनं प्रकर्तव्यं तेन चात्र प्रयत्नतः ।।५७।।

यत्पुण्यं परमं प्रोक्तं ततं यत्र याजिनाम् । सत्यवादिषु यत्पुण्यं यत्पुण्यं हेमदायिनि ।।

तत्पुण्यं लभ्यते विप्र सहस्राब्दस्य जीविभि ।।५८।।

चतुर्दश्यां शुचिस्नात्वा दन्तधावनपूर्वकम् । पौर्णमास्यां तथा कृत्वा चन्द्रपूजां च कारयेत् ।।६०।।

प्रयतैः प्रतिमाः कार्याश्चन्द्रमण्डलसन्निभाः । सहस्रसङ्ख्या ह्यथवा तदर्धं वा तदर्धकम् ।

निजवित्तानुसारेण तदर्धेन तदर्धकम् ।।६२।।

अथवा षोडश शुभा विधातव्याः प्रयत्नतः । चन्द्रपूजां ततः कुर्यादागमोक्तविधानतः ।।६३।।

सोममन्त्रेण होमस्तु कार्यो वित्तानुसारतः । प्रतिमास्थापनं कुर्यात् सोममन्त्रमुदीरयेत् ।।६४।।

सोमोत्पत्तिं सोमसूक्तं पाठयेच्च प्रयत्नतः । पूजनीयौ प्रयत्नेन वस्त्रैश्च द्विजदम्पती ।।६५।।

कर्तव्यं च ततो भूरिदक्षिणादानमुत्तमम् ।

इति श्रीस्कन्दपुराणान्तर्गत वैष्णवखण्डस्य, अयोध्यामाहात्म्ये चन्द्रसहस्र-पूजन-व्रतोद्यापनविधिवर्णनम् ।

सोमोत्पत्तिकथा (अत्रिनयनाभ्यां सोमः समुत्पन्नः) -

पिता सोमस्य वै राजन् जज्ञेऽत्रिर्भगवानृषिः । ब्रह्मणो मानसात् पूर्वं प्रजासर्गं विधित्सतः ।।१।।

तत्रात्रिः सर्वभूतानां तस्थौ स्वतनयैर्युतः । कर्मणा मनसा वाचा शुभान्येव चचार सः ।।२।।

अहिंस्रः सर्वभूतेषु धर्मात्मा संशितव्रतः । काष्ठकुड्यशिलाभूत ऊर्ध्वबाहुर्महाद्युतिः ।।३।।

अनुत्तरं नाम तपो येन तप्तं महत् पुरा । त्रीणि वर्षसहस्राणि दिव्यानीति हि नः श्रुतम् ।।४।।

तत्रोर्ध्वरेतसस्तस्य स्थितस्यानिमिषस्य ह । सोमत्वं तनुरापेदे महासत्त्वस्य भारत ।।५।।

ऊर्ध्वमाचक्रमे तस्य सोमत्वं भावितात्मनः । नेत्राभ्यां वारि सुस्राव दशधा द्योतयद् दिशः ।।६।।

तं गर्भं विधिना हृष्टा दशदेव्यो दशुस्तदा । समेत्य धारयामासुर्न च ताः समशक्नुवन् ।।७।।

स ताभ्यः सहसैवाथ दिग्भ्यो गर्भः प्रभान्वितः । पपात भासयँल्लोकाञ्छीतांशुः सर्वभावनः ।।८।।

यदा न धारणे शक्तास्तस्य गर्भस्य ता दिशः । ततस्ताभिः सहैवाशु निपपात वसुन्धराम् ।।९।।
पतितं सोममालोक्य ब्रह्मा लोकपितामहः । रथमारोपयामास लोकानां हितकाम्यया ।।१०।।
स हि वेदमयस्तात धर्मात्मा सत्यसंग्रहः । युक्तो वाजिसहस्रेण सितेनेति हि नः श्रुतम् ।।११।।
तस्मिन् निपतिते देवाः पुत्रेऽत्रेः परमात्मनि । तुष्टवुर्ब्रह्मणः पुत्रा मानसाः सप्त ये श्रुताः ।।१२।।
तथैवाङ्गिरसस्तत्र भृगुरेवात्मजैः सह । ऋग्भिर्यजुर्भिर्बहुलैरथर्वाङ्गिरसैरपि ।।१३।।
तस्य संस्तूयमानस्य तेजः सोमस्य भास्वतः । आप्यायमानं लोकांस्त्रीन् भासयामास सर्वशः ।।१४।।
स तेन रथमुख्येन सागरान्तां वसुन्धराम् । त्रिःसप्तकृत्वोऽतियशाश्चकाराभिप्रदक्षिणम् ।।१५।।
तस्य यच्च्यावितं तेजः पृथिवीमन्वपद्यत । ओषध्यस्ताः समुद्भूतास्तेजसा प्रज्वलन्त्युत ।।१६।।
ताभिर्धार्यास्त्रयो लोकाः प्रजाश्चैव चतुर्विधाः । पोष्टा हि भगवान् सोमो जगतो जगतीपते ।।१७।।
स लब्धतेजा भगवान् संस्तवैस्तैश्च कर्मभिः । तपस्तेपे महाभाग पद्मानां दशतीर्दश ।।१८।।
हिरण्यवर्णा या देव्यो धारयन्त्यात्मना जगत् । निधिस्तासामभूद्देवः प्रख्यातः स्वेन कर्मणा ।।१९।।
ततस्तस्मै ददौ राज्यं ब्रह्मा ब्रह्मविदां वरः । बीजौषधीनां विप्राणामपां च जनमेजय ।।२०।।

चौराशी० सोऽभिषिक्तो महाराज राजराज्येन राजराट् । लोकांस्त्रीन् भासयामास स्वभासा भास्वतां वरः ।।२१।।

सप्तविंशतिमिन्दोस्तु दाक्षायणीर्महाव्रताः । ददौ प्राचेतसो दक्षो नक्षत्राणीति या विदुः ।।२२।।

(श्रीहरिवंशपुराणस्य हरिवंशपर्वणि, पञ्चविंशोऽध्याये इयं कथा वर्तते)

सूचना - अरू कथाहरूमा भागवत ४ स्कन्ध अ. १ सोमोत्पत्ति (अत्रेः पत्न्याः अनसूयायाः गर्भात् सोमः उत्पन्नः) । (क) पद्मपुराण सृष्टिखण्ड अ. ४ मा 'क्षीरसागरात् सोमोत्पत्तिः' कथा छ । (ख) विष्णुपुराण अंश ४ को अ. ६ श्लो. ५,६,७ । (ग) हरिवंशपर्व अ. २५ । यसैगरी बाराहपुराण, मत्स्यपुराण आदिमा सोमोत्पत्ति कथा पाइन्छ ।

हरि ॐ तत्सत्

श्रीकृष्णार्पणमस्तु

० - चौराशिकोपूजा - ०

सिद्धतो भद्रः

पू०

ब्रह्मा १० रवि १

अधर्न

✲	१	२	३	४	५	६	७	८	९	✲
✲	३२	३३	३४	३५	३६	३७	३८	३९	१०	✲
✲	३१	५६	५७	५८	५९	६०	६१	४०	११	✲
✲	३०	५५	७२	७३	७४	७५	६२	४१	१२	✲
✲	२९	५४	७१	८०	[illegible] ८१	७६	६३	४२	१३	✲
✲	२८	५३	७०	७९	७८	७७	६४	४३	१४	✲
✲	२७	५२	६९	६८	६७	६६	६५	४४	१५	✲
✲	२६	५१	५०	४९	४८	४७	४६	४५	१६	✲
✲	२५	२४	२३	२२	२१	२०	१९	१८	१७	✲
✲	✲	✲	✲	✲	✲	✲	✲	✲	✲	✲

८२

८४

८३


दक्षिण
पूर्व
उत्तर
२७-३५
२३-३१